संस्कृत-विध्यापीठ-ग्रन्थमालायाः सप्ततितमं पुष्पम्

संसरणम्

प्रो. राधावल्लभः त्रिपाठी

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली - 110016

संस्कृतविद्यापीठ-ग्रन्थमालायाः सप्ततितमं पुष्पम्

संसरणम्

लेखकः
प्रो० राधावल्लभः त्रिपाठी
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० रमेशकुमारपाण्डेयः

प्रकाशन-स्थलम्
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-110016

प्रकाशकः

कुलपतिः,

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानित-विश्वविद्यालयः)

कुतुब इन्स्टीट्यूशनल एरिया,

नवदेहली-110016

आइ.एस.बी.एन : 81-87987-26-X

मूल्यम् : ७५ /-

मुद्रकः

अमरप्रिंटिंगप्रैसः

दिल्ली-110009

दूरभाषा : 9871699565, 9891709217

नैवेद्यम्

आचार्यराधावल्लभत्रिपाठिभिः प्रणीतः 'संसरणम्' इति काव्यसंग्रहः नाम्नैव ख्यापयति स्ववैशिष्ट्यम्। संसृतिरेव सृष्टेर्मूलं तच्च प्रतिपद्यं शक्यते द्रष्टुमत्र संग्रहे।

काव्यं हि प्रतिभोद्‌भवं विलक्षणं वर्त्म वाङ्मयस्य। यत्र न प्रवर्तते कश्चिदसारस्वतः। हठात्प्रवर्तमानो यत्किञ्चिदपि निर्माति तन्नावर्जयति सहृदयान्। कदाचिदुद्वेगमपि जनयति। सरस्वती-प्रसादादधिगतवैदुष्यभावा विरला एव सरसं कवयन्ति। तेषामेव प्रातिभसंस्पर्शमासाद्य सुखयति लोकान् समनुभूतिविभूतिः। एतादृशी काचिदनुपमा काव्यसरणिः आचार्यत्रिपाठिनां, यस्यां युगबोधो जिज्ञासूनाम्, भावबोधो भावुकानाम्, प्रबोधः चिन्तकानाम्, सरणिबोधश्च छात्राणां सहजतया जायते। चित्तविस्तृतिः चित्तद्रुतिः शब्दार्थविच्छित्तिश्च सर्वत्र काव्ये विलोक्यते। आधुनिककाव्यरचना-भ्यासशीलानां साहित्यवर्गसमाश्रितानां विद्यार्थिनां सहृदयानाञ्च महते लाभाय संग्रहोऽयमित्यहं सुदृढं प्रत्येमि।

बहुविधेषु कार्यक्रमेषु व्यापृताः सन्तोऽपि श्रीत्रिपाठिनः काव्यक्रियासु कृतादराः स्वकीयमिमं काव्यसंग्रहं विद्यापीठप्रकाशन-मालायाः सौरभमयं पुष्पमिव काव्यपुष्पं प्रायच्छन्नित्यद्वितीयमानन्दं मे जनयति। अहं तेभ्यः हार्दिकीं कृतज्ञतामावहामि।

प्रकाशनायाचिरं प्रस्तुतवते शोधप्रकाशनविभागस्याचार्याय आयुष्मते श्रीरमेशकुमारपाण्डेयाय मङ्गलमाशंसामि।

अमरग्रन्थमुद्रणालयस्य अधिकारिणे श्रीहीरालालमहोदयाय धन्यवादं वितनोमि यस्य प्रयत्नेनायं काव्यसंग्रहः सुरुचिपूर्णतया मुद्रितो जातः।

अन्तेऽहमध्येतॄणां कवयितॄणां सर्वविधं सुखसौविध्यं विद्याबुद्धिविवृद्धिञ्च कामये।

प्रो. वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकीयम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य मानित-विश्वविद्यालयस्य प्रकाशनमालायां संसरणस्य प्रकाशने वस्तुतो विद्यापीठस्य कुलपतिमहोदयानां प्रो. वाचस्पतिउपाध्यायानाम् आधुनिककाव्यप्रचारप्रसारप्रवीणा दृष्टिरेव मूलम्। काव्यसंग्रहोऽयं आधुनिककाव्यस्याध्ययने संलग्नानां साहित्याचार्यपाठ्यक्रमस्य छात्राणामुपकाराय वस्तुतः सङ्कल्पितोऽस्ति किन्तु काव्यगतमाधुर्य-स्यास्वादनं नापेक्षते पाठ्यक्रमविशेषम्। सहृदयतैव तत्र महती योग्यता। यां विना परमोत्कृष्टं काव्यमपि विरसं प्रतिभाति। काव्यतत्त्वविदः सहृदया अवश्यमेव 'संसरणम्' इत्यस्मिन् संग्रहे समुपन्यस्तानां सर्वासां रचनानां सामोदं समास्वादनं विधास्यन्ति।

अनेकेषां काव्यबन्धानां निबद्धॄणाम् आचार्यराधावल्लभत्रिपाठिनां जनजीवनसम्बद्धान् विषयान् क्रोडीकृत्य प्रवर्त्तिता सर्वथाऽभिनवा काव्यशैली झटिति काव्यरसास्वादनानुकूल्यं विदधाति। संस्कृतभाषायाः साधारणं ज्ञानमेवापेक्षितं विद्यतेऽत्र काव्यार्थपरिशीलनाय। वैदर्भीरीति-माश्रित्य विविधेष्वसरेषु समनुभूता एव विषया अत्र वर्णिताः सन्ति ते सर्वेऽपि सर्वजनसुखबोध्या आत्मीया एव प्रतिभान्ति।

अस्मिन् संग्रहे विद्यमानासु पञ्चसु सरणिषु षष्टिसंख्याकानि काव्यानि संकलितानि सन्ति। तानि सर्वाण्यपि भावोत्कर्षं प्रतन्तुं परस्परं प्रतिस्पर्धन्ते। गीतप्रवाहमयप्रथमसरणेः, संकल्पसदनात्म-

कद्वितीयसरणेः, स्मृतीनामुपवनात्मकतृतीयसरणेः, अन्यापदेशसंसारात्मक-चतुर्थसरणेः, पुनर्यात्रात्मकपञ्चमसरणेश्च प्रतिपद्यं विशिष्टा वैदग्ध्यभङ्गी विराजते। न केवलं काव्यस्य निर्माणेऽपितु काव्यस्य समीक्षणेऽपि लब्धकीर्त्तयो ग्रन्थस्यास्य प्रणेतार आचार्याः त्रिपाठिनः छात्रवात्सल्य-भावं गभीरतया बिभ्रति। अतो हेतोः छात्रकल्याणकामनया प्रार्थिता मया झटित्येव सम्पूर्णं काव्यं सज्जीकृत्य विद्यापीठाय प्रकाशनार्थं समर्पितवन्तः। तेषां सौजन्यमूर्त्तीनामग्रजकल्पानामाधमर्ण्यमहं शिरसा बिभर्मि।

आशासे यत् काव्यस्यास्यास्वादनेनामन्दमानन्दमनुभविष्यन्ति सहृदयाः पाठका इति।

प्रो. रमेशकुमारपाण्डेयः
सम्पादकः

भूमिका

नाहं कवित्वाभिमानं बिभर्मि। कविरस्मीत्यपि न जाने। संस्कृते रचितेषु पद्यकदम्बकेषु इतः पूर्वं सन्धानम् (1986) सम्प्लवः (2000) इति काव्यसङ्ग्रहौ, लहरीदशकमिति (1992, द्वि.सं. 2003) दशलहरीणां सङ्कलनम्, गीतधीवरमिति (1995) रागकाव्यं च मदुपज्ञानि प्राकाश्यं यातानि। अस्मिन् संसरणे प्रायः गतेषु पञ्चस्वब्देषु विरचिता रचनाः सङ्गृहीताः। द्वित्राः विहाय सर्वा अपि रचना इदम्प्रथमतया प्रकाशमायान्ति।

संसरणमिदं मम काव्ययात्रायाः कांश्चन पथपरीवर्तान् समावेशयति। यात्रागता अवरोधाः स्खलनानि मार्गभ्रंशा अपि अत्र दृश्येरन्। परं यथा यात्रेति शीर्षकान्वितायामिह सङ्कलितायां गीतौ कथितं मयैव -

अविश्रान्तं समारब्धाऽवरुद्धा नापि यात्रेयम्।
उपक्रान्ताऽथ भूयोऽपि मदीया कापि यात्रेयम्।।

समुच्छ्वासा ननु प्राप्ताः विसृष्टाश्चाथ निश्वासाः।
प्रतिश्वासं प्रवृत्ताऽऽस्ते सविश्वासं हि यात्रेयम्।।

ततः स्यात् कण्टकैः कामं कियद्भिर्वाप्यसौ मार्गः।
न रुद्धा रुध्यते नो वा कदाचित् क्वापि यात्रेयम्।।

युगेभ्यः केभ्य ऐषा सा सुदूराद्वा समारब्धा।
युगान्तं वल्लभस्यैषा न चान्तं याति यात्रेयम्।।

अनुक्रमः

प्रथमा सरणिः

गीतप्रवाहः

द्वितीया सरणिः

सङ्कल्पसदनम्

तृतीया सरणिः
स्मृतीनामुपवने

चतुर्थी सरणिः
अन्यापदेशसंसारे

प्रथमा सरणिः

गीतप्रवाहः

2- अकस्मात्

अकस्मात् सर्वनाशोऽयं नु सञ्जातः सखे कस्मात्।
चकम्पे भूः समुद्रोऽयं समुत्थो हन्त खे कस्मात्?।।

न वेलां लङ्घयेदब्धिस्त्विति प्राचां वचो मिथ्या।
अकस्मात् ताण्डवं चक्रुर्लहर्यस्ताः पुरे कस्मात्?।।

गतास्ते धीवरा जालं समादायासमुद्रान्तम्।
जलस्यैवेश्वराः सन्तो विलीनास्ते जले कस्मात्?।।

न काङ्क्षाऽऽसीत् सुखानां मे न दुःखेभ्यः समुद्वेगः।
अकस्माद् दुःखमायातं क्षणप्राप्ते सुखे कस्मात्?।।

हविः स्वात्मैव सङ्क्लृप्तः पुरोडाशीकृतः कायः।
इमाश्छायाश्च राक्षस्योऽवतीर्णा मे मखे कस्मात्?।।

मनोभूः सश्रमं कृष्टा तथोप्तं कामनाबीजम्।
तुषारापात आशायाः कृषेर्जातस्त्वरे कस्मात्।।

अकस्मात् प्राघुणो भूत्वा समायातः स आनन्दः।
अकस्माद् वल्लभप्रेमप्रकाशोऽस्मिन् पुरे कस्मात्?।।

–000–

1. मग्नम्

न मग्नं शास्त्रचर्चायां न लग्नं पण्डितं दृष्ट्वा।
मनो मग्नं परं सद्यः कपोले कूपकं दृष्ट्वा।।

अगाधानां समुद्राणां न भग्नं वीचिसङ्घातैः।
मनो भग्नं तु नेत्रे ते जलस्यैकं कणं दृष्ट्वा।।

प्रवृत्ते शस्त्रसम्पाते विदीर्णं नो रणे घोरे।
मनो दीर्णं मुखं बन्धोर्विषादेनाङ्कितं दृष्ट्वा।।

न दग्धं दाववह्नेर्यत् समन्तादुन्मिषज्ज्वालैः।
मनो दग्धं परं तूर्णं सरोषं वल्लभं दृष्ट्वा।।

–000–

4- हसन्ती

निदाघे दूरतो याते गते मेघोदये शीते।
हसन्तीं तां प्रियां स्वीयां हसन्तीं कामये शीते।।

सुखं सुस्वागतं मन्ये वदन्तीं सस्मितं जोषम्।
प्रभापूर्णाननेनैनां हसन्तीं तां भजे शीते।।

अभिख्यां कामपि प्राप्ता दरिद्राणां गृहेऽस्माकम्।
हसन्ती पुण्यवह्निः सा हसन्ती सात्त्विकी शीते।।

गृहं मे दीपयन्ती स्वैरमूल्यैर्दीपिताङ्गारैः।
शुभैः रत्नप्रभैर्नित्यं हसन्तीं भावये शीते।।

इयं यज्ञवेदी मे हुतं प्राज्यं मया चाज्यम्।
तृणं मन्येथ साम्राज्यं हसन्तीं चेल्लभे शीते।।

न मे तापप्रदैर्यन्त्रैरहो कार्यं क्वचित् तीक्ष्णैः।
हसन्तीं चारुशीलां तां सदाऽहं कामये शीते।।

इयं स्पृष्टा दहेत् तेजो वमन्ती भामिनी तीक्ष्णा।
बिना स्पर्शं स्वहस्ताभ्यां हसन्तीं लालये शीते।।

अहं हासोऽस्मि भासो वा न जाने कालिदासो वा।
हसन्त्या वल्लभः सोऽहं हसन्तीं पालये शीते।।

–000–

3- विश्वासः

प्रतिश्वासं सविश्वासो मया प्राप्तो जगत्यस्मिन्।
समुच्छ्वासः सदा दुःखे मया प्राप्तो जगत्यस्मिन्।।

सदैवोच्चावचे मार्गे प्रयातोऽहं स्खलन्नासम्।
अकस्माच्चावलम्बस्ते मया प्राप्तो जगत्यस्मिन्।।

प्रभिन्नाः सन्तु सिद्धान्ता रुचीनां स्याच्च वैचित्र्यम्।
अभिन्नो वल्लभप्रेमा मया प्राप्तो जगत्यस्मिन्।।

शताब्दीषु व्यतीतासु क्वचिद् यो नैव लब्धः स्यात्।
स एकस्मिन् क्षणे लब्धो मयऽऽ नन्दो जगत्यस्मिन्।।

जनिं लब्ध्वा गतो वृद्धिं शनैर्वृद्धश्च सञ्जातः।
प्रियो वो वल्लभो गन्ता यथा प्राप्तो जगत्यस्मिन्।।

–000–

4- हसन्ती

निदाघे दूरतो याते गते मेघोदये शीते।
हसन्तीं तां प्रियां स्वीयां हसन्तीं कामये शीते।।

सुखं सुस्वागतं मन्ये वदन्तीं सस्मितं जोषम्।
प्रभापूर्णाननेनैनां हसन्तीं तां भजे शीते।।

अभिख्यां कामपि प्राप्ता दरिद्राणां गृहेऽस्माकम्।
हसन्ती पुण्यवह्निः सा हसन्ती सात्त्विकी शीते।।

गृहं मे दीपयन्ती स्वैरमूल्यैर्दीपिताङ्गारैः।
शुभै रत्नप्रभैर्नित्यं हसन्तीं भावये शीते।।

इयं यज्ञवेदी मे हुतं प्राज्यं मया चाज्यम्।
तृणं मन्येथ साम्राज्यं हसन्तीं चेल्लभे शीते।।

न मे तापप्रदैर्यन्त्रैरहो कार्यं क्वचित् तीक्ष्णैः।
हसन्तीं चारुशीलां तां सदाऽहं कामये शीते।।

इयं स्पृष्टा दहेत् तेजो वमन्ती भामिनी तीक्ष्णा।
बिना स्पर्शं स्वहस्ताभ्यां हसन्तीं लालये शीते।।

अहं हासोऽस्मि भासो वा न जाने कालिदासो वा।
हसन्त्या वल्लभः सोऽहं हसन्तीं पालये शीते।।

–000–

5-दोषः

प्रभातायां रजन्यां यत् समायातः प्रदोषोऽयम्।
गतश्चास्तं दिने सूर्यो न जाने कस्य दोषोऽयम्।।

अकस्मात् ताण्डवं नृत्तं रुषा यद् धूर्जटिस्तेने।
चकम्पे भूर्विलग्ना धूर्न जाने कस्य दोषोऽयम्।।

समुद्रः क्षोभितः कस्मात् प्रचण्डा चोत्थिता वात्या।
विभग्नं वारियानं यन्न जाने कस्य दोषोऽयम्।।

विशाले वारियानेऽब्धौ कुतश्चिन्नीयमानं तत्।
सृतं वारांनिधौ तैलं न जाने कस्य दोषोऽयम्।।

समुद्रे लोडितं तैलं महद्दुर्गन्धसंयुक्तम्।
जलं तैलाविलं जातं न जाने कस्य दोषोऽयम्।।

इदं भस्मासुरप्रख्यं शिवात् साक्षाद् वरं लब्ध्वा।
शिवं कामं गिलत् सृप्तं न जाने कस्य दोषोऽयम्।।

विधातुः सृष्टिराद्या सा हता क्षीणा गता दैन्यम्।
म्रियन्ते जन्तवस्तेऽब्धौ यन्न जाने कस्य दोषोऽयम्।।

दशन्ती विश्वसौभाग्यं शिवं तैलावलिर्नैषा।
सृता सर्पावलिः साक्षान् न जाने कस्य दोषोऽयम्।।

म्रियन्ते पक्षहीनास्ते परं दीना अहो मीनाः।
जलं यद् दूषितं सर्वं न जाने कस्य दोषोऽयम्।।

चिरात् ते वल्लभः प्रेम्णा प्रसादायास्मि सोत्कण्ठः।
न रोषोऽद्यापि ते यातो न जाने कस्य दोषोऽयम्।।

–000–

6- देहली

प्रतीक्षायां पदं त्वेकं ममान्तस्तद् बहिश्चान्यत्।
स्थितैषा चानयोर्मध्ये त्वधस्ताद् देहली सेयम्।।

इमामेव प्रयातो मे प्रियः क्रान्त्वा सुदूरं यत्।
इमामुल्लङ्घ्य चागन्तेति पूज्या देहली चेयम्।।

परावृत्तं जगत् सर्वं विपर्यासं स्थितिर्याता।
परावृत्ता मनाङ् नैषा तटस्था देहली केयम्।।

-000-

7- मुग्धता लुप्ता

इतो भ्रष्टा ततो नष्टा जगज्जाले क्वचिद् गुप्ता।
महामौढ्ये नु जाड्ये वा नु मोघे मुग्धता लुप्ता।।

इतो दृष्टा ततो लीना प्रदर्श्य स्वां च्छविं कोणात्।
घनध्वान्ते तडिल्लेखा क्व मेघे मुग्धता लुप्ता।।

प्रकृष्टे यन्त्रजाले वा प्रवृद्धे तन्त्रजाले वा।
द्वयोः सा पट्टयोः पिष्टा समूलं मुग्धता लुप्ता।।

प्रभातायां तु शर्वर्यां हिमार्द्रे वाति वायौ सा।
अवश्यायस्य बिन्दुर्वे तृणाग्रे मुग्धता लुप्ता।।

विनीता चावशं नीता सुशीला सा गृहे पत्युः।
वधूर्दग्धेव सा क्रूरैः गृहे स्वे मुग्धता लुप्ता।।

निजग्रामात् पुरं याने पुराद्वा राजधानीं च।
स्वदेशाद्वा विदेशं च प्रयाणे मुग्धता लुप्ता।।

इतश्चैवापणानां यः प्रसारो वैश्विको भूयः।
क्व हट्टानां च सङ्घट्टे जनौघे मुग्धता लुप्ता।।

नरा लुम्पन्त्यरण्यान्यां पशूंस्ते हिंसका लोभात्।
वने लुप्ते वनाद् व्याघ्रे विलुप्ते मुग्धता लुप्ता।।

क्वचिद् दृष्टा क्वचिल्लुप्ता कपोले कूपकप्रख्या।
शिशोर्हास्ये प्रियालास्ये नु किं वा मुग्धता लुप्ता।।

असंस्कारैर्हता विद्या अनास्थाभिर्हता प्रज्ञा।
अविश्वासैर्हतः प्रेमा तथा ते मुग्धता लुप्ता।।

गते ज्ञाने समायाते नवीने चैव विज्ञाने।
सखेदं स्वेदसङ्काशा सखे खे मुग्धता लुप्ता।।

ववौ गङ्गैव या पुण्या पुरा सारस्वती धारा।
मरौ सा वर्तमानस्य प्रशुष्के मुग्धता लुप्ता।।

कृतौ ते 'वल्लभ' प्रीत्या नवाविष्कारमानीता।
पुनश्चाविर्भवत्येषा युगे या मुग्धता लुप्ता।।

–000–

8- शिष्टा

न दास्ये वा न वा भक्तौ विशिष्टा मुग्धता शिष्टा।
तवास्ये तद्गते हास्ये च मुग्धे मुग्धता शिष्टा।।

धुता सा शाश्वती पुण्या नवीनैर्वायुभिर्दूरम्।
क्वचिद् वृक्षे क्वचित् पत्रेऽथ पुष्पे साधुता शिष्टा।।

विलीनं तत् कवोष्णत्वं मनुष्याणां च सम्बन्धे।
दरिद्राणां च निःश्वासे मनाक् सैवोष्णता शिष्टा।।

गतं हास्यं हतं लास्यं गतास्ते ते विलासा वै।
न जाने वल्लभस्यैषा कथं भावोष्णता शिष्टा।।

–000–

9- हस्तकम्

घने कोलाहले व्याप्ते कथं वा श्रूयतां सद्यः।
त्वदीये द्वारि मन्दं भोर्मया यद् हस्तकं दत्तम्।।

मनोद्वारं दृढं रुद्धं त्वयोपेक्षार्गलाभिर्यत्।
कपाटोद्घाटनार्थं तन्मया स्वं हस्तकं दत्तम्।।

स्खलन्तं वीक्ष्यं मां स्नेहात् त्वया हे वल्लभप्राणे!
स्वहस्तेनाथ मे हस्तं गृहीत्वा हस्तकं दत्तम्।।

–000–

10- मुक्तिः

इतो भ्रष्टा ततो नष्टा वितन्वन्तीव छालिक्यम्।
मया मुक्तिः क्वचिल्लब्धा क्वचित्सा नाशिता क्व स्यात्।।

इदं ते मां सदा प्राहुः सदा मुक्तोऽसि नो बद्धः।
कदा मुक्तिः समायाता न जाने सा गता क्व स्यात्।।
त्वमेवानुप्रविष्टाऽस्मिन् यदा मे मानसे नित्यम्।
अहं बद्धश्च मुक्तिस्ते कथं वा केवला क्व स्यात्।।

–000–

11- द्वारे

ददध्वं चाखिलं सर्वं कपाटं मत्कृते द्वारे।
प्रवेशायावकाशः स्यात् क्वचिन्मे किन्तु ते द्वारे।।

समायातोऽस्मि ते द्वारं कपाटेऽनावृते कुर्याः।
विशेषो वाचि किं चैवं किमर्थं पृच्छ्यते द्वारे।।

–000–

12- भाषायाः

त्वया नोक्तं मुखाच्छब्दो मया नोऽश्रावि भाषायाः।
कृतं ते चेप्सितं मौनं कर्म भाषायाः।।

न शब्दे वा न वाक्ये वा पदार्थे नापि वाक्यार्थे।
मदीये मानसे पूर्णं स्फुटं स्यान्मर्म भाषायाः।।

समं साहित्यसौन्दर्यप्रभाभूयिष्ठसाम्राज्ये।
धृतं यस्मिन् शिवं सत्यं त्विदं वै धर्म भाषायाः।।

पदार्थे क्वापि वाक्यार्थो पदार्थो वापि वाक्यार्थे।
समुच्छ्वासस्तथा भावे त्विदं वै नर्म भाषायाः।।

स शूरः पण्डितो वासौ कविर्वा क्रान्तदर्शी वा।
भिनत्ति च्छद्मनाऽऽच्छन्नं दृढं यो वर्म भाषायाः।।

कियद् रक्तं कियन्मांसं कियत्यो वेदना दृष्टाः।
अपास्तं वल्लभेनैतत् यदा वै चर्म भाषायाः।।

–000–

13- गानम्

भवेत् कामं लयैर्हीनं सदोषं मामकं गानम्।
मनस्ते संस्पृशेदीषत् क्वचित् तन्मामकं गानम्।।

इदं नाकर्णितं केनाप्यहो कोलाहले तूच्चे।
मदीये देह एव स्यात् विशीर्णं मामकं गानम्।।

श्रुतं केनापि नैव स्यात् प्रविष्टं कर्णशष्कुल्याम्।
श्रुतं तद् वल्लभेन स्यात् तदेतन्मामकं गानम्।।

धरायाः श्वभ्र एकस्मिन् समुद्भूतं नवं सूतम्।
समस्तं व्योम विस्तीर्णं स्पृशेत् तन्मामकं गानम्।।

–000–

14- दीर्णम्

न दीर्णं दुःखसङ्घातै रणाह्वानैश्च नो दीर्णम्।
नकारेणैव बन्धो ते कथं चेदं मनो दीर्णम्।।

विकीर्णं सर्वमद्यत्वे जगज्जातं च सङ्कीर्णम्।
प्रकीर्णं जीवनं जातं जगज्जाले मनो जीर्णम्।।

इदं तीर्णं जगत् सर्वं यशः स्वीयं तथा कीर्णम्।
विशीर्णं चान्तरैर्घातैस्तथाप्येतन्मनो जीर्णम्।।

–000–

15- निद्रा

प्रदोषे कर्मणि व्यग्रो निशीथे चिन्तया तान्तः।
मूहूर्तश्चागतो ब्राह्मो परं सा नागता निद्रा।।

धृतिर्बद्धा मतिर्नद्धा परं किं वा करोम्याहो।
जजागार त्वदीया यत् स्मृतिर्हा नागता निद्रा।।

कथं निद्रामि मत्पार्श्वे त्वयं जागर्ति मे स्वप्नः।
अमुं पश्यामि प्रत्यक्षं ततः सा नागता निद्रा।।

अहं स्वप्ने निविष्टो वा मयि स्वप्नोऽथवा विष्टः।
इति प्रत्यूहमानस्य प्रयाता नागता निद्रा।।

परामृष्टा भृशं वैद्या चिकित्सा कारिता भूयः।
न रोगः कोऽपि ते चाहुः परं सा नागता निद्रा।।

–000–

16- कृतज्ञोऽहम्

उपेक्षन्तेऽद्य मां सर्वे जनास्तेषां कृतज्ञोऽहम्।
पदा चास्कन्द्य मां याता भृशं तेषां कृतज्ञोऽहम्।।

जुगुप्सा वा त्ववज्ञा वा मया प्राप्ता सदा येषाम्।
स्वकीयः शोधितस्त्वात्मा भृशं तेषां कृतज्ञोऽहम्।।

–000–

17- दैनन्दिनी

कथां मा पृच्छ बन्धो नः क्व गन्तॄणां क्व यातानाम्।
इतो भ्रष्टास्ततो नष्टा इयं दैनन्दिनी जाता।।

किमर्थं कामये पत्रं किमर्थं लेखनीं याचे।
सजीवा मत्कृते यत् त्वं सुखं दैनन्दिनी जाता।।

व्रणं त्वेकं हृदिस्थं किं कथं वा दर्शयामस्ते।
क्षते क्षारं सदाऽऽवाप्तं त्वियं दैनन्दिनी जाता।।

कषाघाता इयन्तो मे नियत्या सत्तया दत्ताः।
क्षणं सुप्तं क्षणं बुद्धं त्वियं दैनन्दिनी जाता।।

मृतो हन्त क्षणे ऽन्यस्मिन् क्षणे ऽहं यत् पुनर्जातः।
इदानीं वल्लभस्यैषा त्वियं दैनन्दिनी जाता।।

–000–

18 - पन्थाः

न मां त्वं क्वापि सम्प्राप्ता मया ते लोकितः पन्थाः।
सकाशं ते गतो नाहं मया ते लोकितः पन्थाः।।

अशोकोऽहं पदाघातं प्रतीक्षे ते सशोकः सन्।
स्वयं गन्तुं न शक्तस्तन्मया ते लोकितः पन्थाः।।

पदं दत्तं यदा चाग्रे दृढं तद् वल्लभेनैकम्।
तमश्छन्नेऽपि संसारे स्वयं चोन्मीलितः पन्थाः।।

–000–

19- केयम्

तटी तत्रोज्झिता दूरं पटी मत्सम्मुखं केयम्।
किमासीद् वस्तुतो ध्येयं समुत्था कुज्झटी केयम्।।

विषं वा स्यात् सुधा वा स्यात् रसो वा जीवनस्य स्यात्।
अमुष्याम्, याऽऽगता चाक्ष्णोः पुरो मे सा घटी केयम्।।

क्वचिद् दृष्टा क्वचिल्लुप्ता विधातुः सृष्टिराद्येव।
नरीनृत्यत्यहो रम्यं समक्षं वै नटी केयम्।।

–000–

20- न जात्वासीत्

कदा नासीद्विषादो वा कदा नासीच्च दुःखं वा।
स्थितिश्चैतावती हीना त्वितः पूर्वं न जात्वासीत्।।

मनःखेदस्तपःखेदो पुराप्यासीद् गलत्स्वेदः।
धरित्री किन्तु सा दीना त्वितः पूर्वं न जात्वासीत्।।

मुखं व्यादाय चायाताः समस्याः ध्वंसिताः पूर्वम्।
समस्या मर्म कृन्तन्तीत्यतः पूर्वं न जात्वासीत्।।

स्थितिश्चैषा गतिश्चैषा तथा चैषा रतिः कार्ये।
प्रिया सा वल्लभस्यैतादृशी पूर्वं न जात्वासीत्।।

–000–

21- मनोहारः

न शक्तो जातुचित् सोऽहं स्वयं कर्तुं मनोहारम्।
अकुण्ठं चार्पये तुभ्यं समग्रं स्वं मनोहारम्।।

गृहीताः पुष्पहारास्ते तु सर्वे नेतृभिर्धृष्टम्।
अतो रक्षामि नित्यं तं निगूढं स्वं मनोहारम्।।

न यातः कण्ठहारत्वं कदाचित् सुन्दरीणां वा।
अमूल्यं किन्तु मन्येऽहं सुधन्यं स्वं मनोहारम्।।

–000–

22- मनोरथः

गतो न कुत्रचित्त्वहं विनिर्गतो मनोरथः।
सुदूर एष किन्नु मे गतस्ततो मनोरथः।।

न यत्र देवता बुधा न चन्द्रमा न भास्करः।
क्वचिद् गतास्तु तत्र मे परं गतो मनोरथः।।

न याति नापि च स्थिरो न वा निवर्तते क्वचित्।
न चागतो न लीयते तथागतो मनोरथः।।

गतं गतं निवर्तते पयः पुनर्न वा वयः।
निवर्तते पुनः पुनः परं गतो मनोरथः।।

न कामना न वासना न शिष्यते च भावना।
विशिष्यते च केवलं विचित्रितो मनोरथः।।

तमोनिरुद्धदिक्षु वा प्रजल्पितासु वाक्षु वा।
निनाय वल्लभं प्रियां प्रति स्तुतो मनोरथः।।

–000–

23- ईश्वरः

मयान्विष्टः स यत्रापीश्वरस्तत्र नैवासीत्।
क्वचित् स्वप्ने निगूढोऽसौ बहिः किन्तु नैवाऽऽसीत्।।

व्यथाभिर्दीनहीनानां भृशं खिन्नोऽवसन्नः सन्।
वसन् कोणे कुटीराणां स तस्मान्मन्दिरे नासीत्।।

क्वचिल्लुप्तः क्वचिद्गुप्तस्त्वकस्मात् प्रादुरासीत्सः।
निबद्धः काव्यबन्धे वा स्वरे गीतस्य वा चासीत्।।

न भोगे नापि चाटूक्तौ न भक्तौ यः क्वचिद् रेमे।
शिशोर्हास्ये तथा लास्ये स मुग्धाया लसन्नासीत्।।

–000–

24- यात्रा

अविश्रान्तं समारब्धाऽन रुद्धा क्वापि यात्रेयम्।
उपक्रान्ताऽथ भूयोऽपि मदीया कापि यात्रेयम्।।

विरामो नैव मन्तव्यः क्षणं यत् स्थितो द्रष्टुम्।
अहं मुग्धे तु मुग्धस्त्वां समाप्ता नापि यात्रेयम्।।

समुच्छ्वासा ननु प्राप्ताः विसृष्टाश्चाथ निश्वासाः।
प्रतिश्वासं प्रवृत्तास्ते सविश्वासं हि यात्रेयम्।।

ततः स्यात् कण्टकैः कामं कियद्भिर्वाप्यसौ मार्गः।
न रुद्धा रुध्यते नो वा कदाचित् क्वापि यात्रेयम्।।

युगेभ्यः केभ्य एषा सा सुदूराद्वा समारब्धा।
युगान्तं वल्लभस्यैषा न चान्तं याति यात्रेयम्।।

–000–

25- मुषितम्

वसता सागरमध्ये तृषितम्
पारावारे सर्वं मुषितम्।

जनतन्त्रे जाते शठतन्त्रे
जनतायाः सर्वस्वं मुषितम्।

कारं कारं सञ्चयमनिशं
नो ज्ञातं यत् सर्वं मुषितम्।

ज्ञायं ज्ञायं चरणौ निहितौ
भीत्या तस्मात् सर्वं मुषितम्।

मोषं मोषं मम परितोषं
त्वया तु जोषं किं किं मुषितम्।

उषितं दिनत्रयं केवलमिह
नगरे तेऽस्मिन् सर्वं मुषितम्।।

–000–

द्वितीया सरणिः

सङ्कल्पसदनम्

1- आत्मसङ्कल्पशतकम्

ऋतं सत्यं तपस्तेजो विद्या शौचं दमः क्षमा।
व्यवसायात्मिका बुद्धिर्धारयन्तुसदैव माम्।।1 ।।

एतौ यातां मम स्वैरमव्याहतगती क्षमौ।
अकम्प्यौ जवनौ पादौ धारयेद् धरणी च माम्।।2 ।।

अधमर्णः समस्तायाः सृष्टे र्यावत् कणं प्रति।
उत्तमर्णो भविष्यामि सृष्टे र्यावत् कणं प्रति।। 3।।

सफलोऽहं भविष्यामि कृतकृत्यो ह्यसंशयम्।
द्विषां मूर्ध्नि पदं दत्वा स्वस्य मूर्ध्न्याशिषः सताम्।।4।।

आत्मदीपो भविष्यामि प्रतिकर्म प्रतिक्षणम्।
बाधाः सर्वाः अपाकुर्वन्नपायेषु निराकुलः।।5।।

रचयन् स्वयमाकाशमनल्पं कल्पनाकृतम्।
घटयन्नन्तरिक्षं स्वं ग्रहनक्षत्रमण्डलम्।।6।।

उपायान् निखिलांश्चित्वा कुसुमानीव सर्वशः।
सत्त्वस्य स्वस्य सूत्रे तान् ग्रथित्वा पौरुषस्रजः।।7।।

कर्मदेवस्य पूजायामर्पयामि निरन्तरम्।
सदा सिद्ध्या परिणयस्तस्मात् सञ्जायते च मे।। 8।।

वरमालाः करे धृत्वा सिद्धिर्वृद्धिश्च मत्कृते।
अहंपूर्विकयोपेते जीवनस्य स्वयंवरे।।9।।

सौरभं यशसां कामं पुष्पाणां नु सदागतिः।
सदागतिः सदा दिक्षु सारयामि सदागतिः।।10।।

यत्र यत्र प्रयातौ मे चरणौ च निराकुलौ।
विघ्ना आस्कन्दितास्तत्र पलायन्तेऽथवा स्वयम्।।11।।

आत्मानं च शरं कृत्वा मनोज्यां योजयन् दृढाम्।
देहेन धनुषा कामं करिष्ये लक्ष्यवेधनम्।।12।।

देवताः सर्वभूतानां वसन्तो हृदि सर्वदा।
मदीयं चेष्टितं दृष्ट्वा स्मयन्ते सर्वदा मुदा।।13।।

विश्वस्तानां च विश्वास उच्छ्वासः सज्जनस्य वै।
आर्तानां चास्मि निःश्वासः श्रमिकानां श्वास एव स च।।14।।

स्वीकारः सत्पथगतेरनुकारोऽस्मि सूरिणाम्।
हुङ्कारोऽहं निषेधाय दुष्टानां च कृते सदा।।15।।

हाहाकारः सहस्राब्दैः शोषितानां तपस्विनाम्।
चीत्कारस्तु तथैवाहं दलितानां तथा सताम्।।16।।

अनुसारोऽस्मि मार्गाणां कृतानां पूर्वसूरिभिः।
कुप्रथानां कुरीतीनामस्वीकारो दृढस्तथा।।17।।

अध्वनां च तथाऽध्वन्यो येऽनूचानैर्विनिर्मिताः।
परैरक्षुण्णमार्गाणां निर्माणेऽस्मि क्षमः परम्।।18।।

प्रत्यादेशोऽस्मि परुषः वञ्चकानां च दुष्कृताम्।
आक्रान्तानां पुरः सीम्नो गिरिर्हिमालयो यथा।।19।।

रूढीनां ध्वंस एवास्मि स्रंसः कंसस्य दुर्मतेः।
कुप्रथाशवयात्रायां मुदा चैवांसदायकः।।20।।

परम्परासमुल्लासो हासः सुजनसङ्गतेः।
सुरीतीनां विकासश्च श्रुतेर्वासस्तथा स्मृतेः।।21।।

एकोऽहं बहुधा व्यक्तः प्रतिकर्म व्यवस्थितः।
निवसन् स्वे गृहे यातस्तासु तासु चे वीथिषु।।22।।

सदा जागरितः स्वप्नं पश्यन् तक्षंश्च तं स्वयम्।
स्वप्नलोकं स्वकीयं च धरित्र्यामवतारयन्।।23।।

कुम्भयोनिसदृक्षाणां महतां पुरतो नतः।
विन्ध्याचलसमः सेतुर्दक्षिणोत्तरयोरहम्।।24।।

जर्जरो जर्जरीकर्तुं कृत्वा जर्जरपूजनम्।
पापानां ध्वंसनायालं जर्जरश्चाप्यजर्जरः।।25।।

विघ्ना मदीयसङ्कल्पैश्चूर्णिताः शीर्णतां गताः।
शिरो निपातयन्त्येते प्रस्तरे स्वकृते स्वकम्।।26।।

देहे मे क्षालितैरद्भिः पुण्यैः सुकृतनिर्मिते।
निवसन्तु प्रसन्नास्ते स्वयमागत्य देवताः।।27।।

ब्रह्मरन्ध्रे सदा ब्रह्मा ललाटे च तनूनपात्।
भ्रुवोर्मध्ये शिवः साक्षान्नासायां च मरुद्गणाः।।28।।

भ्रुवि रुद्रस्तथा सूर्यो दक्षिणे नयने शुभः।
वामे नेत्रे तथा सोमः घ्राणे वायुस्तथा शिवः।।29।।

मनो वासगृहं जातं सरस्वत्याः सह श्रिया।
ओष्ठराग उषा शुभ्रा काम ओष्ठेऽधरे तथा।।30।।

अग्रहस्ते तथा लक्ष्मीः हस्तयोरिन्द्र एव सः।
बृहस्पतिस्तथा कर्णे अग्निश्च मम नेत्रयोः।।31।।

हृदये चामृतं प्रेम्णः चित्ते चैत्यगृहे तथा।
निवसेन्नित्यमेवासौ सुस्थश्चैवात्मपूरुषः।।32।।

पवनो जवनः पादे पर्जन्यश्च तथा स्वरे।
रसना रङ्गभूर्जाता कलाया अमृतात्मनः।।33।।

चित्ताधारे तथा वाचां दारुभिः कर्मभित्तिभिः।
देवालयो विनिर्मायि मया स्वे देहमन्दिरे।।34।।

देहे बृहस्पतिं चित्ते वेदान्तं धारयन् शिवे।
साक्षी शून्योऽपि पूर्णोऽहं विचराम्यत्र भूतले।।35।।

आत्मवानपि नैरात्म्ये सततं समवस्थितः।
शून्येऽशून्यं कलाशून्यो कलयामि कलाधरः।।36।।

बुद्धस्य करुणां धृत्वा वृत्वा लक्ष्मीं सरस्वतीम्।
अपरिग्रहभावस्थो विचरामि चराचरे।।37।।

सर्वतः सर्वनाशे च जायमानेऽविनश्वरः।
जगतश्च श्मशानेऽस्मिन् स्थाणुश्चाचलः स्थितः।।38।।

स्वयमेवात्मनो बन्धुः स्वयं चैवात्मनो गुरुः।
धारयाम्यात्मनाऽऽत्मानं धारयामि जगत् तथा।।39।।

प्रत्यादिशन्ति परुषाः प्रत्यवाया यथा यथा।
तथा तथा मदीयाऽपि स्वात्मनिष्ठा प्रवर्धते।।40।।

प्रत्यादिष्टोऽपि बहुशः सत्तया मदमत्तया।
अकम्प्यो रचयाम्येनां प्रतिसत्तां स्वकर्मणा।।41।।

अहमेवात्मनः स्वर्गं निर्मामि नरकं तथा।
निवसाम्यात्मना तृप्तः रौरवेऽपि सगौरवम्।।42।।

नत्वहं कामये स्वर्गं वाजपेयैर्विनिर्मितम्।
निर्मातुं च द्वितीयं यत् स्वर्गं त्वस्मि क्षमः स्वयम्।।43।।

दावानलेऽस्य जगतः दुरितैश्च दुराग्रहैः।
चटत्कारं धमत्कारं दुष्टैः संधुक्षिते भृशम्।।44।।

निपातितोऽस्मि ज्वालासु विधिनाऽविधिपूर्वकम्।
सन्तप्तः सर्वतो हेम सञ्जातः शुद्ध एव सः।।45।।

नामितं यच्छिरो नैव स्वाभिमानसमुन्नतम्।
प्रभूणां पुरतः क्वापि दुर्मदानां स्वसत्तया।।46।।

पुरस्तत्तु प्रकृष्टानां गुरूणां गुणशालिनाम्।
स्वे महिम्नि स्थितानां तन्मदीयं विनतं स्वतः।।47।।

पीडाभिस्तु मया व्योम समग्रं चापि मामितम्।
सहिष्णुताभिरथ सा धरणी चापि तोलिता।।48।।

हतप्रौञ्छनभाग्यस्य ललाटात् पततोऽविरतम्।
स्वेदस्य चापि दुर्गन्धे दारिद्र्ये वितते तथा।।49।।

तितिक्षायां प्रतीक्षायां वेदनायां मुहुर्मुहुः।
ईश्वरस्य मया साक्षाद् दर्शनं सहजं कृतम्।।50।।

विश्वे मदीयचैतन्यं सर्वतः प्रतिबिम्बितम्।
विश्वं मदीयचैतन्ये सर्वतः प्रतिबिम्बितम्।।51।।

आवर्तन्तो विवर्तन्ते सहस्राब्धो विलोडिताः।
मदीये मानसे कालः बम्भ्रमीति ससम्भ्रमम्।।52।।

कालेन किं मम च्छिन्नं यत्प्रवाहे स्थिरोऽस्म्यहम्।
कालं करतले धृत्वा नर्तयामि त्वहं सदा।।53।।

कियदायुर्ममादः स्यादिति वक्तुं न शक्यते।
परः सहस्रवर्षेभ्यः सृष्टेः पान्थोऽस्मि संव्रजन्।। 54।।

स्वयमेव समेत्यासौ वाग्देवता सरस्वती।
पयस्विनी पयःपूरं प्रददौ मन्मुखेऽञ्चलम्।।55।।

सुखं दुःखं तथा मोह आनन्दः करुणा परा।
अनन्ता वेदनाऽनन्तं प्रेम चास्मिन् चराचरे।।56।।

अमी यथा परिव्याप्ता ममान्तःकरणे तथा।
सम्प्लवोऽहं तथा पुञ्जो घटितः परमाणुभिः।।57।।

महाशर्यैर्महाभव्यैराशयानां महात्मनाम्।
रजसां वा कणैश्चापि पांसुभिर्धरणीगतैः।।58।।

मां वेधा विदधे येन महाभूतसमाधिना।
पूर्वजानां महास्वप्नास्तस्मिन् केचन सङ्गताः।।59।।

देवताः सर्व एवैताः भ्रष्टैरुत्कोचदातृभिः।
साटोपं धूर्तपाखण्डैः पूजिताः प्रस्तरायिताः।।60।।

अहं कवोष्णैः निःश्वासैरनाडम्बरमेव ताः।
सामग्रीरहितः सर्वाः पूजयामि निरन्तरम्।।61।।

शरीरं स्वं धनुः कृत्वा वाङ्मयं कवचं दृढम्।
सङ्ग्रामभूमौ संसारे सत्सङ्कल्पैः शिवैः शरैः।।62।।

मनोरथे समारूढो व्यूहं निर्माय कर्मभिः।
युध्ये नित्यमनाचारविपद्विध्वंसशत्रुभिः।।63।।

श्वासो घ्राणे गतिः पादे दृष्टिश्च मम नेत्रयोः।
मुखे वाणी सदा सत्या सञ्चारो हस्तयोस्तथा।।64।।

मानसे सदसद्व्यक्तिर्नित्यं जागरिता पुनः।
एतानि यदि वर्तन्ते तर्हि का मे दरिद्रता ।।65।।

संस्कारेष्वनुविद्धा या यासौ सिद्धा सरस्वती।
अनूचानेभ्य या प्राप्ता प्राप्ता पित्रोर्गुरोस्तथा।।66।।

चित्तं स्वं तितउं कृत्वा संस्कृता पाविता पुनः।
पोषयेद् वर्धयेन्मां सा पोषिता परिवर्धिता ।।67।।

कृता च सुकृता चापि या वै वाग् धृता धृता।
कामधुग् कल्पनाकान्ता कल्पान्तेष्वपि संस्थिता।।68।।

युगे युगे तथा चापि संयुगे संयुगे तथा।
रक्षन्ती सततं भूयो पृष्ठतः पुरतस्तथा।।69।।

बालकस्य यथाह्वाने धावित्वा समुपागता।
मातेव स्मयमाना या सा स्वैरं समुपैतु माम्।।70।।

निर्गतः स्वर्णप्रासादादतिक्रम्य च देहलीम्।
परिग्रहे च गार्हस्थ्ये वानप्रस्थं श्रितः स्वकम्।।71।।

प्रकामं सामयं स्वीयं कायं पश्यन् निरामयः।
शीर्णं स्वयमशीर्णश्च देहे विदेहतां गतः।।72।।

यातायातस्य सम्मर्दे जनसङ्घट्टसङ्कुले।
कोलाहलेषु यानानामेकाकी विचराम्यहम्।।73।।

पञ्जिकानां महापुञ्जे मज्जितश्चोद्गतः स्वयम्।
एकान्तेऽभावयञ्छून्येऽनन्तं स्वान्तमनाकुलम्।।74।।

युक्तोऽहं तेन देवेन संस्थितो यो जने जने।
अधितिष्ठति यश्चैनां योजने योजने धराम्।। 75।।

जगद्वेद्याः सदस्योऽहं जीवनस्य महाध्वरे।
विश्वार्पणं ब्रह्महविर्जुहोम्यात्मनात्मना।।76।।

प्रतिक्षणं पुनर्जाये चार्पयन् बलिमात्मनः।
नश्वरस्यापि मे तस्मादमृतत्वं प्रकल्पितम्।।77।।

सत्यस्य कवचं धृत्वा सङ्कल्पाश्वनियोजिते।
मनोरथे समारूढो युध्ये जीवनसङ्गरे।। 78।।

आत्मनेत्रेण साक्षी सन् पश्याम्यात्मानमात्मना।
आत्मप्रासादसंस्थोऽपि पान्थोऽनन्तस्य चाध्वनः।।79।।

अहमेव गृहं जातस्त्वहं सम्मार्जकः स्वयम्।
आत्मानं मार्जनीं कृत्वा मृजाम्यात्मनमात्मना।। 80।।

अहमेव स्वयं चासं कच्चरं तन्मलीमसम्।
यन्मया मार्जितं, शिष्टं मार्जनात् सोऽप्यहं पुनः।। 81।।

निःश्रेणीं चैव निर्मामि स्वस्य चेतनयाऽद्भुताम्।
आरोहणाय प्रासादं मुक्तेस्तं सप्तभूमिकम्।। 82।।

आत्मनाऽहं तपस्यामि विनिर्मायाश्रमं तनुम्।
चैतन्यं पर्णशालां स्वं कृत्वा मनस आसनम्।।83।।

परया पारदृश्वा सन्, पश्यन्त्या दृष्टिमाप्तवान्।
आरुढो मध्यमाभूमिं वैखरीं संस्करोमि स्वाम्।। 84।।

वाचा चापि तपस्यामि संस्कारार्थसमृद्धया।
सर्वं जल्पं जपीकुर्वन् मन्त्रीकुर्वंश्च मन्त्रितम्।। 85।।

प्रकाशं तनुयां नित्यं वह्निर्भूत्वा सदा ज्वलन्।
शठैरास्कन्दितः क्वापि नैव स्यां भस्मनां चयः।।86।।

जलेन सदृशो नित्यं प्रसन्नः स्यां वहन् सदा।
अवरुद्धः क्वचिन्न स्यां पङ्काक्तः पल्वलो यथा।। 87।।

सर्वसहोऽपि वसुमान् क्षमेव क्षमयान्वितः।
वसुवान् वसुधेवास्मि धरेवाहं स्थिरस्तथा।।88।।

वायुर्भूत्वा वहेयं च स र्वदैव प्रसारयन्।
कर्मणां च विचाराणां यशसां सौरभं सदा।।89।।

आकाशेन समो भूत्वा तिष्ठेयं च निराकुलः।
उज्ज्वलो निर्विकारश्च निर्विकल्पो निरञ्जनः।।90।।

संसार एष निखिलः परिवर्तनमेष्यति।
मदीयैरेव यत्नैस्तु नैतत् सम्भाव्यते ध्रुवम्।।91।।

तडागे प्रस्तरः क्षिप्तः लहरीं जनयेद् यदा।
अन्या लहर्यो जायन्ते लहर्या सृतया तया।।92।।

स्वल्पेनापि मदीयेन संरम्भेन तथैव च।
उपक्रमस्तु क्रमश आरभ्येत शुभङ्करः।।93।।

सर्वैः शिल्पैः शिवं चिन्वन् श्वासैर्विश्वासमाप्नुवन्।
कर्मणाहं तपस्यामि संसारस्य तपोवने।। 94।।

देहं स्वं घोटकं कृत्वा सप्रयत्नमवेक्षितम्।
दिक्कालयोर्महायामे सञ्चराम्यकुतोभयम्।। 95।।

तपो मे वर्धतां नित्यं विघ्नैर्नापि च बाधितम्।
महारम्भो महोत्साहो स्यामहं च निराकुलः।। 96।।

आत्मानं संस्कृतीकुर्वन् वाचा संस्कृतया मुदा।
संसारस्य च संस्कारे संलग्नः स्यामनारतम्।।97।।

तमिस्रायां च घोरायामात्मदीपं प्रकाशयन्।
रूपान्तरे च विश्वस्य संलग्नः स्यां निराकुलः।।98।।

आत्मर्पणं चात्महविः सारथ्यं स्वात्मनः कृतम्।
आत्मसद्म च गन्तव्यमात्मयानेन मे ध्रुवम्।। 99।।

सङ्कल्पशतकं ह्येतद् राधावल्लभनिर्मितम्।
विश्वात्मने विश्वकर्त्रे आत्मने च समर्पितम्।।100।।

–000–

2- आर्यापञ्चाशत्

अङ्गनरूढा तुलसी म्लायति शुष्यति तथा च केदारः।
नव्यगृहस्थो नव्यां कण्टकिनीं सिञ्चति प्रेम्णा।।1।।

अभिनयमयजीवनमिदमभितो नयतीह काचिदज्ञाता।
यं यं यामि च देशं हृदये धृत्वा प्रयामि तां च।।2।।

व्यङ्क्तुं स्वास्तित्वं प्रभवामि कथं कथं नु लोकेऽहम्।
यदि वितनोमि न सार्थां रचनावचनावलिं स्वीयाम्।।3।।

गगनकविं तं वन्दे कवयति यस्मिन् धराऽधरादुत्का।
आकाशं संस्पृष्टुं डयमाना हि निखिला विभाति।।4।।

आत्मनि विश्वासो यत् जागर्त्यस्यास्तु कोऽपि ननु नार्याः।
श्वासैर्दूरीकुरुते सङ्कटतमिस्रचयं साऽद्य।।5।।

ईषत् स्मितमधरेऽस्या ईषद् रागस्तथा कपोलेऽपि।
ईषदीषच्च चरणे निहिते गन्तुं बहिस्तयाद्य।।6।।

ऋजुना पदमपि निहिते पश्यन्ति जनास्तु वक्रया दृष्ट्या।
तिर्यक् यान्ति कुपथगाः स्वैरं स्वैरं तथाऽनृजवः।।7।।

एकं चैकं देयं पदमिह कविनात्र सावधानेन।
पदविक्षेपो माभूत् कवितामार्गेऽति जटिलतरे।।8।।

ऐक्यं त्वनेकतायामेक्ये विष्टा तथा त्वनेकतापि।
बीजादेकाद् वृक्षो वृक्षात् बीजं पुनर्भविता।।9।।

कर्मणि सततं सक्त्या नावापि शर्म न वा नर्म मया।
सादो घर्मो गाढं ग्लपयति नितरां मदीयमर्म।।10।।

करपटमपि गृह्णन् स्वे करेऽथवा कर्पटं परिदधानः।
कार्पासेन तनुं स्वां वृक्षेणालिङ्गितां मन्ये।।11।।

कार्पासं तं वृक्षं स्मरामि वस्त्रं यदा परिदधामि।
श्लिष्यति यदिदं मेऽङ्गे तस्यैव तु तन्तुभिः स्यूतम्।।12।।

कोणे क्वापि तथासीदुद्याने मम पुरा स कार्पासः।
शुभ्रैराचितमभवत् प्रतिशरदं यस्तु तूलसुमैः।।13।।

कासारा हतसारा भीष्मे ग्रीष्मे खगाश्च डयमानाः।
उड्डीना गतवन्तो जलाविलं च प्रदेशं ते।।14।।

कृकलासा सञ्जाता नक्रा वा अद्य तु जना विचित्रा ये।
परिवर्तयन्ति वर्णं कृत्रिमवाष्पै रुदन्ति तथा।।15।।

कवयः स्वैरं रुचिरं सुचिरं वयतां स्वकाव्यवितानम्।
राधावल्लभनामा हृत्स्पन्दे केवलं कवयति।।16।।

खग्रासः सञ्जातः दिवसो गिलितस्तथा मलीमसयाया।
दलिता दिल्लीनगरी विस्फोटैर्भूयसाऽऽतङ्कात्।।17।।

ग्रसितं शङ्कातङ्कैर्हसितं जीवनधनं महानगरे।
हसितं लुप्तं लुप्तो रागो दन्तच्छदाद्धन्त।।18।।

गगनं गगनाकारं सागर एषोऽस्ति सागराकारः।
जीवनसागर एष द्वाभ्यामपि किल विशालतरः।।19।।

ग्रामे नगरं विष्टं नगरेऽपि ग्रामता समाक्रान्ता।
ग्रामनगरसङ्घट्टे पिष्टः सकलो गुणग्रामः।।20।।

चैत्रे चित्तं सततं विततं विशदीकृतं समेषां नः।
चित्रं चापि विचित्रं रसयतु सुतरां प्रमोदशतम्।।21।।

छन्दोबद्धा कविता प्रवहति कुल्यासमं प्रणाले सा।
पूर्वनिश्चिते मार्गे रुद्धा भवति च सृता सुकरम्।।22।।

छन्दसि मुक्ते कविता रचिता निर्झरसमं प्रवहमाणा।
मार्गं स्वीयं घटयति निघ्नन्ती विघ्नसङ्घट्टम्।।23।।

छन्दोभङ्गे जाते वृत्तं घटितं विचित्रमेवैतत्।
सहजं यद् यद् रचितं छन्दस्तदेव तु सञ्जातम्।।24।।

जीवन एव च्छन्दश्छन्दसि विलसति च जीवनं सर्वम्।
छन्दोजीवनयोर्वा न विशेषं किमपि मन्येऽहम्।।25।।

झटिति किमपि रचनीयं घटनीयं किमपि चैव हि विशिष्टम्।
चिन्तासन्ततितान्तं स्वान्तं सुकवे कथं वहसि।।26।।

दृष्टा दितिजा ऽऽक्षितिजं क्षितिमेतां च क्षयं नयन्तस्ते।
दृष्टाश्चादितिजा वा मनुजाः परन्तु लयं याताः।।27।।

धर्मोऽसौ किं भविता यत्र न कविता स्फुटेत् स्वहृदयात् सा।
भित्वा भित्तिं भीतेर्हेतुं चैक्यं न यो व्यङ्क्ते।।28।।

नाहं याचे भक्तिं प्रणतिपरामपि न वाऽनुरक्तिं च।
शक्तिं याचे सुदृढामभिनवयुगनिर्मितौ दक्षाम्।।29।।

नितरां क्षीणो मलिनो सीदन् पङ्कप्लुते तथा गर्ते।
दीनो हीनो मीनो यातु क्व पक्षविहीनोयम्।।30।।

नृत्यति डोम्बी डोम्बीं प्रसरति लहरी स्वरैस्तदीयैः सा।
सम्मोहनमिव जालं निविडं वयति स्थले तथा गगने।।31।।

पवनझङ्कारश्चित्ते तनुतेऽब्धाविव तरङ्गततिं जातु।
स्मृतिं त्वदीयां सहसा जागरितां करोति सा तु।।31।।

पिङ्गलवर्णैः प्रसवैरानम्रसहस्रमस्तका एते।
हेमच्छन्नं क्षेत्रं विदधति गोधूमपादपाश्च।।32।।

प्रत्ययचन्दनलेपं पुरतो मसृणं खलो विधत्तेऽसौ।
पश्चात् तूष्णीं सहसा च्छुरिकाघातं करोतीव।।33।।

प्रकृतेः प्रयोगशाला निखिला जगती विभात्यनुपमेया।
क्षणे क्षणे विलसन्ती नित्यनवीना तथाऽनन्ता।।34।।

बन्धनमपि मुक्तेर्मे श्रेयो भविता यदीह बद्धस्याम्।
प्रीतिबन्धने सततं, बद्धाः ये ते सदा मुक्ताः।।35।।

मथनं करुणासिन्धोः व्यथाकथानां तथा च संहरणम्।
कर्तुं शक्तास्तेभ्यो नमो नरेभ्यो ममास्तु सदा।।36।।

मम मनसः सङ्गणके कतिचन लुप्तास्तु पञ्जिकास्तास्ताः।
उत्कायते च तेषां ग्रहणे पुनरपि मनश्चेदम्।।37।।

मरुभूमिः सञ्जाता सिक्ता शस्यैः श्यामला।
चित्तगता मरुभूमिं सेक्तुममरुकं नु कुत्र लभे ?।।38।।

विन्ध्यो यथा ह्यगस्त्यं भैमीं यथा विकलस्य बाहुकोऽपि।
प्रतिपालयामि विकलस्त्वामिह सततमयि प्रिये।।39।।

यामि च यामि च यातुं कुर्वेऽहं वै मनः स्वकीयं यत्।
कथमिव कस्माद्धेतोर्निवारयसि मां बलादवशम्।।40।।

रणितं नूपुरजातं कुरुते रणरणकमाशु चित्तेषु।
नर्तक्या नृत्यन्त्या विस्मृतमर्यादचित्तेषु।।41।।

राष्ट्रियताया भावो नाशं यातु स मदप्रमादकरः।
राष्ट्रीयत्वं विकसतु स्वस्थं सहजं समाजहितम्।।42।।

लुप्ताः सकलाश्च कलाः विकला जाता धरापि सर्वेयम्।
सकलकलं पुरमेतत् सकलङ्कं भाति चन्द्रसमम्।।43।।

वलिभिः कायाऽऽक्रान्ता माया रसयति न पूर्वमिव चैषा।
विलसति कापि च्छाया सम्बन्धेऽद्यापि नस्तथापि।।44।।

वृद्धावस्थोपेता पलिताः सिताश्च भवन्ति मे केशाः।
देहे जर्जरगेहे स्वात्मा शुभ्रस्सुनिर्मलोऽस्ति।।45।।

शब्दैरर्थैर्भावैः सङ्कल्पैश्च सततं तथात्मानम्।
आवापैरुद्वापैः पुनरपि पुनरपि नवीकुर्वे।।46।।

सत्यं शस्त्रं सत्यं शास्त्रं सत्यं तथा ब्रह्मास्त्रम्।
जीवन एवं यस्य हि सेव्यः सोऽयं सदा गान्धी।।47।।

समजनि सखि रजनीयं रजनीगन्धा सुगन्धभरिता सा।
पृच्छति किं ते मथयति मनो नु मनोहरकालेऽस्मिन्?।।48।।

सर्वं नवमिव जातं लब्धा सा नवकरी यदैवेष्टा।
नष्टं तद् दारिद्र्यं दुरितं दैन्यं तथा दुःखम्।।49।।

हालाहलमपि सततं गङ्गाधर इव बिभर्मि कण्ठे स्वे।
संस्कृतसंस्कृतिचन्द्रं शीर्षे सादरमयं वहामि।।50।।

हिमहतनलिनीसदृशी परम्परा यद् विभाति चाद्यत्वे।
प्रसरति तमसि च गाढे सत्त्वे स्वीये स्थिता तथापि।।51।।

-000-

3- वार्धक्यम्

केशाः कृष्णकथां विहाय धवला जायन्त एते पुन-
श्छिन्नं किं मम तेन हन्त सफलं रक्तं तु रक्तं मम।।
आयुर्यद्यपि यातमस्ति बहुशो शिष्टं विशिष्टं बहु।
धन्योऽहं धरणीतलेऽत्र निवसन् जातोऽस्मि वृद्धः पुमान्।।

वार्धक्ये समुपागते स्वयमहो लीनानि यद् विस्मृतौ।
केषाञ्चिद् यदि यानि कान्यपि तथा नामानि रूपाणि वै।।
स्मर्तव्यं किल तिष्ठतीह सकलं यन्मत्कृतेऽलं भवेद्।
धत्ते कान्तिमतीं छविं हृदि तु या जागर्ति वै सा स्मृतिः।।

आरोढुं नहि पारयामि विपुलाभोगान् नभश्चुम्बिनः।
तांस्तान् भूमिधरान् न तरीतुमपि नो सिन्धून् समुद्रान् तथा।।
कृत्स्नं किन्तु निभालयामि सहजं देवस्य काव्यं जगत्।
शोभां तां च निरीक्षितुं तु प्रभवाम्याराच्च पार्यन्तिकीम्।।

-000-

तृतीया सरणिः

स्मृतीनामुपवने

1- देशस्मृतिः

रोमन्थनमिव सततं कुरुते चेतः स्मृतेः रहसि सदैव।
ध्यायं ध्यायं पुलकितकायं प्रातस्तथा सायम्।।

तास्ताः क्रीडास्तास्ता व्रीडाः सोढास्तथा च ताः पीडाः।
रचितान्यसकृन्नीडान्युपवन इव जीवने च मया।।

खग इव खलु खे गामी यद्यपि सुतरां स्वतन्त्र इव यामि।
देशः सूर्यो दूरात् सहजं स्पृशति स करैर्मामपि।।

खग इव पोतात् स्वैरं डयमानः खे स्थितेषु देशेषु।
अभ्रमभ्रं पुनरपि देशं स्वीयं परावर्ते।।

-000-

2-संस्कृता

उन्मेषं नवमेव या प्रतियुगं व्यानक् विकासान्वितं
प्राचीनं परिरक्ष्य शास्त्रनिचयं नव्येन संयोज्य तत्।
भव्यं भारतवर्षवैभवमहो सारं च सारस्वतं
ज्योतिः प्रातिभमुज्ज्वलं च सकलं सन्दर्शयन्ती शिवम्।।1।।

दग्ध्वाऽऽत्मानमसौ हि वह्निविहगो भस्मावशेषात् पुनः
नव्यं जन्म समश्नुते समधिकं सञ्जायते प्राणवान्।
प्रत्येकं च युगे तथैव सहजं कालाध्वरे संस्कृता
हुत्वाऽऽत्मानमियं नवैव नितरां जाता पुनर्जायते।। 2।।

यावत्याधुनिकी सनातनतनुः सा तावती शाश्वती
या चोषा इव जायते नवनवा भूयो युगे वै युगे।
नानाधर्मसमाजजातिवचसामेकत्वसंसाधने
एकस्माच्च तथा तथा प्रकटने पट्वी बहूनामियम्।। 3।।

वंशस्थस्य सतश्चरित्रसुमनोभी राजते स्रग्धरा
सौन्दर्येण लसद्वसन्ततिलका क्वापीन्द्रवज्राऽथवा।
या कस्यापि तपोवनस्य हरिणी संरक्षिता ज्ञानिभिः
काले सैव तु संस्कृता प्रकुरुते शार्दूलविक्रीडितम्।। 4।।

या गङ्गेव जलोद्धतताः गतिमती श्रीशालिनी स्वागता
पृथ्वी संस्कृतिगीतिका सुवदना पथ्या सदा वाणिनी।
वासन्ती ललिता जगत्युपवने सा पुष्पिताग्रा लता
आर्या चापि रथोद्धता भुवि दिवो नीतेव भागीरथी।। 5।।

भाषा नैव तु केवलं, किल युगोन्नद्धा प्रवाहान्विता
सा कापीह परम्पराऽस्ति महती सत्साधनासंयुता।
तामेतामधिकृत्य संस्कृतमहः सर्वत्र सञ्जायतां
राष्ट्रस्याथ भवेत् समस्तजगतस्तोषाय मोदाय च।।6।।

-000-

3-अहिल्याचरितम्

याऽनाहतं नादमयी सदैव हृत्तन्त्रिकां झङ्कृतिमानयन्ती।
वीणां तथा मानवदेहमेनं या मूर्च्छनाभिर्विदधात्यपूर्वम्।।

सदा वसन्तीं हृदयारविन्दे लक्ष्मीमपूर्वां प्रतिभाभिधानाम्।
मनुष्यचित्ते पटलान्यनन्तान्युन्मीलयन्तीं स्व करैः प्रकाशैः।।

सञ्चारिणीं दीपशिखामिवार्थे चित्तस्य रङ्गे प्रविकासयन्तीम्।
विश्वं समस्तं च पुनः सृजन्तीं वाग्देवतां तां शिरसा नतोऽस्मि।।

वाल्मीकिमाद्यं च कविं प्रपन्नो व्यासं महाभारतकारमीडे।
काव्यस्य चोपक्रम एष भक्त्या तं कालिदासं च कविं स्मरामि।।

हृद्या सदा या हृदयप्रदेशे देशस्य वै राजति मध्यभागे।
भूमिः कवीनां विदुषां प्रसूर्वै वन्द्या सदा मालवभूमिरेषा।।

गम्भीरनद्या परिधीयमाना सिप्रानिलैः या परिवीज्यमाना।
चर्मण्वतींवारितरङ्गसिक्ता रेवाजलैः पावितभूमिभागा।।

मानैर्नराणां च लवे लवे या गाढं पिनद्धा किल वीरभूमिः।
समुन्नतैर्भारतभूमिभालैर्मालैर्युतामालवभूमिरेषा ।।

राज्ञा तथा ध्वस्तशकेन तेन संवत्सरस्थापनकीर्तितेन।
त्रिविक्रमप्रख्यपराक्रमेण संवर्धिता या किल विक्रमेण।।

साहित्यविज्ञानकलाप्रवीणो गीर्णाणवाणीसमुपासकोऽभूत्।
राजा प्रजावल्लभ एव यस्यां धाराधरावल्लभभोजदेवः।।

आधारभूमिः स परम्परायाः आराधिताशेषकलाप्रपञ्चः।
निःस्यान्दिनी यस्य च काव्यधारा धाराधरायाः स नृपोऽद्वितीयः।।

कृष्णापि मृत्स्ना किल यत्र कृत्स्ना गोधूमराशिं च सुवर्णतुल्यम्।
कर्णावतंसप्रभमञ्जरीभिः सूते जगत् पोषयितुं समर्थम्।।

कार्पासपुञ्जैः शशिशङ्खशुभ्रैः क्षेत्राणि यत्र प्रविकासभाञ्जि।
कृत्स्नां धरित्रीं परिधापयन्ति नानाविधं वस्त्रवितानजातम्।।

विहङ्गमैर्भारतभूमिकीर्तिं गायद्भिरापादितवंशकृत्यैः।
श्रीभर्तृमेण्ठैः कविकालिदासैरावासिता वासमयीव यष्टिः।।
ओङ्कारमीशं गिरिजागणेशौ कालेश्वरो भैरवकार्तिकेयौ।
यस्यां हि साक्षान्निवसन्ति दिव्या वन्द्या नु सा मालवभूमिरादौ।।

महेश्वरे मण्डनमिश्रगेहे श्रीशङ्करो दिग्विजयप्रवृद्धः।
जित्वेह तं मण्डनमिश्रवर्यं दारैरमुष्याथ पराजितोऽभूत्।।

तस्या रजो मूर्ध्नि निधाय भूम्याः तत्सेविकायाश्चरितं प्रवक्ष्ये।
अस्मिन्नहिल्येत्यभिधानवत्याः काव्येऽवदातं च गुणाभिरामम्।।

राज्ञां प्रभूणां स्तुतिभिर्नतेन व्यर्थैर्वितानैर्वचसां हतेन।
तेनेदृशा किं वचसा कवीनां यद् देव्यहिल्याचरितं न तेने।।

एकाकिनी जीवनसङ्गरे सा निस्सङ्गभावं युधे च जिग्ये।
सङ्गाह्य सा कज्जलराशिकक्षं तस्माद् विनिर्याय च निष्कलङ्कम्।।

लिङ्गैर्मुदासंवृतविक्रियायाणां जृम्भादिलिङ्गैरतिनिष्क्रियाणाम्।
लिङ्गैश्च तैस्तैर्विहितक्रियाणां लिङ्गेन शैवेन शुभं वहन्तीम्।।

नानाविधानैः शिवसन्निधानैस्तां सन्निधात्रीं शिवमङ्गनानाम्।
पापाद् विरक्तां च शिवानुरक्तां सक्तां जनानां हितसाधनायाम्।।

शुष्के मरौ सञ्चलितेव कुल्या ध्वान्ते समुद्भासितचन्द्रतुल्या।
माङ्गल्यमूलापि जगत्यमूल्या वन्द्या न केषां भुवि सा त्वहिल्या।।

उद्दामदुःखाग्निविदह्यमाना विघ्नैः पुनश्च प्रतिहन्यमाना।
स्नेहेन मुक्तैः खलतां प्रयातैर्या पीडिता नैव जहौ स्वधैर्यम्।।

राष्ट्रे नवीनं त्वितिहासवृत्तं या वै ससर्ज स्वनवीनवृत्तैः।
नारीविमुक्तेरभवत् स्वकृत्यैराश्वासदात्री च तथाग्रदूती।।

क्षेमं प्रजानां च सदा वहन्ती चास्थां स्वकीयां न तथा त्यजन्ती।
आज्ञां गुरूणां बहु मानयन्ती वन्द्या जनानां भुवि सा त्वहिल्या।।

सर्वं सहा सा जननी प्रजानां सा प्रेरयित्री बहुधा नयानाम्।
नेत्री च निःश्रेयसकर्मणां या साकृष्टपच्येव धरा ह्यहिल्या।।

एषा बभौ काञ्चनपद्ममूर्तिर्व्यनक्ति कान्तिं प्रतिनूतनां या।
क्षणं क्षणं चाग्निपरीक्षणं या सीतेव सेहे च सदैव तूष्णीम्।।

या राजनीत्या हृदि खातशल्या बद्धाऽनिशं वा खलता कुवल्या।
धर्मप्रिया जीवनयुद्धलग्ना क्लमं ययौ नैव कदाप्यहिल्या।।

आसीदशेषवसुधातिलकः प्रजानां
प्रेष्ठो गुणेषु सकलेषु तथा वरिष्ठः।
मल्हारराव इति होलकरो नरेन्द्रो
देवेन्द्रवन्निपुणमिन्द्रपुरीं शशास।।

सम्पालयन् वसुमतीमतिकौशलेन
प्रीत्या च नीत्या च निरस्तभीत्या।
शुभ्रं यशःपटवितानमसौ वितेने
लक्ष्मीं ततान नितरामितरानपेक्षम्।।

कार्यं समाचरति चस्म स दिक्समीक्षम्
तीक्ष्णो बभूव खलतासु ततान दण्डम्।
कार्यानुरोधमनिशं च ररक्ष साधुः।
सामान्यसाधुजनतासु मृदुर्बभूव।।

सौम्या च सत्कुलवधूः कुलरीतिविज्ञा
विज्ञानदानकुशला च वचःप्रवीणा।
नार्या विभूषणमिव प्रकृतौ तथार्या
भार्या बभूव किल तस्य च गोतमीति।।

प्रासूत पुत्रमतुलं कुलदीपकं सा
मल्हाररावहृदयोच्छ्वसितं शुभज्ञा।
संस्कारमस्य च विधाय शुभं च खण्डे-
रावेति नाम विहितं कुलरीतिविज्ञैः।

आह्लादयन् तौ पितरौ गुणैः स्वै-
र्बाल्यात् परं सोऽथ वयः प्रपेदे।
तस्मिन् निधाय नृपतिर्निजराज्यभारं
तीर्थाटनाय च जगाम विदर्भदेशम्।।

तत्रैव चाहम्मदपूर्वपुर्यां प्राप्तो
विशालं बहुमल्लशालम्।
चौडीति ग्रामं च गुणाभिरामं
ग्रामं गुणानां गतवान् स भूपः।।

ग्रामं गुणस्य सकलस्य जनाभिरामं
धर्माभिरामसुजनं किल माणकोजीम्।

ग्रामे ददर्श नृपतिश्च तथास्य भार्या-
मार्याभिरामचरितां विदितां सुशीलाम्।।

कन्याऽनयोः सुविनयाभरणा प्रवीणा
साऽऽसीदहिल्या सुकृतैरतुल्या।
संख्यासु दक्षं च तथैव सांख्ये
योगे मनोऽस्याः न्यविशच्च शास्त्रे।।

दृष्ट्वा तुतोष हृदयं नृपतेरहिल्यां
पुत्राय सोऽथ सुगुणां वरयाम्बभूव।
तां चाह साऽथ जननी तनयां निगूह्य
स्वीयाञ्चले चलदृशा बहुवाष्पपूरम्।।

इन्दूरसंज्ञकमितस्तु पुरेऽतिदूरे
गन्तासि पुत्रि मम जीवनसारभूते।
कामं कुलं बहुतरं महनीयमेषां
प्राज्यं च राज्यमपि सौख्यसमृद्धिजुष्टम्।।

स्थानं समीक्ष्य खलु तद् बहुविप्रकृष्टं
कृष्टं मनो भवति वेदनया मदीयम्।
भाग्यं त्वदीयमथ नश्च वियोगदुःखं
स्यादेतदपि हन्त विधेर्विधानम्।।

दायं दायं विदायं बहुविधलपितैः जल्पितैस्ता विलापैः
सख्यस्तां वारयन्त्यः प्ररुदितमपि तत्रैव रोद्धुं च शेकुः।
स्वैरं स्वैरं तथा ताः सकरुणमनसाऽऽश्वास्य चैनामहिल्यां
सम्बन्धिन्यश्च जन्यः प्रमुदितहृदया जन्यवासे च निन्युः।।

इत्थं प्राप्ता वधूः सा स्वपितुरिह गृहात् गण्यमानैर्विधिज्ञैः
लोकाचारं समस्तं बहुविधमभवच्चोत्सवास्ते तथैव।
हर्षैः कृष्टं च सर्वं पुरमपि सकलं चेन्दुरं सोल्लसद्भिः
वाद्यैर्गीतैः प्रहर्षैः सकलकलमभूदिन्दुतुल्यं समग्रम्।।

कन्याऽसौ मम कापि नाभवदिति प्राप्ता मया कन्यका
दारान् सोऽपि गुणाश्रितांश्च तनयः सम्प्राप्तवान् पुत्रकः।
इत्येवं बहु वर्धिता पतिगृहे श्वश्वा भृशं लालिता
साऽहिल्या स्वशुचं च विस्मृतवती माङ्गल्यमूर्तिर्वधूः।।

श्वश्रूस्तां च जगाद वत्सलरसा गोपाय्य स्वाङ्गे मुदा
मा भैषीरियमागता स्वनिलयं वत्से द्वितीयं गृहम्।
रात्रौ तां परिधाप्य चारुनवलां शाटीं सुमालङ्कृतां
सख्यस्तां च वरप्रकोष्ठमनयन् धृत्वा प्रकोष्ठं मुदा।।

खाण्डेराव इतश्च तां सहचरीं पश्यन् परं कौतुकाद्
दर्शं दर्शमगाधसागरसमे जातो निमग्नः सुखे।
रूपं ते कमनीयमीदृगपि वा शीलं गुणाः ईदृशा
सर्वं चार्विततितोषयन् स्ववचसाऽऽलिङ्गंश्च जग्राह ताम्।।

दीप्तं कामजमग्निमस्य च मुहुः सन्धुक्षितं शान्तया
वाचा साऽशमयत् जलप्लव इव प्रेम्णो निमज्याह च।
वार्तां कामपि तादृशीं प्रियकरीं प्रीत्या तथा कुर्वहे
येन प्रीतिलताऽऽवयोरपि तथा सञ्जायतां पुष्पिता।।

देहस्यापरदेहसङ्गघटना प्रीतिः किमेषैव वा?
किं चान्यत् त्वथवा भवेद्यदि पुनर्जानासि बाले वद।

प्रेमा कोऽप्यमृतैः पवित्रमनसो भावैः स्वभावैर्युतः
भद्रं मङ्गलविग्रहं च कथमप्येकं हि तत् प्राप्यते।।

त्वं दासी ननु सेविकेति पुरुषाः शब्दैः कुठारोपमैः
नारीणां हृदयालवाललतिकाः कृन्तन्ति निघ्नन्ति ताः।।

इत्युक्त्वा सहसा रुरोद बहुशो फूत्कृत्य सा बालिका
किङ्कर्तव्यविमूढ आस स पुनर्दृष्ट्वा च तां क्लेशिताम्।।

मा रोदीरयि गद्गदेन वचसा तामाह खिन्नो भृशं
त्वं विज्ञासि च पण्डितासि सुभगे त्वं सत्यवक्त्री ध्रुवम्।
इत्युक्त्वा विरराम चैष सुभगाऽहिल्यापि जोषं स्थिता
स्वात्मानं मनुते स्म दुःखविकलां चैकाकिनीं चोज्झिताम्।।

ऊढा किन्नु मया नु कापि युवती, वा पण्डिता मानिनी
चेत्थं तर्कवितर्ककीलितमनाः सुप्तः परावृत्य सः।
आविष्टं कृपया तथाऽन्यमनसं विज्ञाय तूर्णं पतिं
साऽहिल्या त्रपया युतापि कृपया प्रोवाच रम्याः कथाः।।

जानाति स्म मनोभवव्यकतिकरं किन्त्वस्य सा कामनां
उत्तालाब्धितरङ्गभङ्गतुमुलां सोढुं न शक्ता त्वभूत्।
पश्यन् स्निग्धदृशैव वर्जित इमामावर्जिताङ्गीमितः
तां रात्रिं च निनाय केवलमसौ वाचैव सन्तर्पितः।।

दाम्पत्यं च तयोरभूत् सुखमयं यस्मिन् कमप्यद्भुतं
संसारं रचयाम्बभूवतुरुभौ कान्तं च शान्तं तथा।
किन्त्वेतां विधिरच्छिनत् सुखलतां कष्टेन संरोपितां
खाण्डेराव उपागतश्च निधनं रोगात् तथा पीडितः।।

विललाप च वाष्पगद्‌गदं सहजामप्यपहाय धीरताम्।
व्यसनं करुणामयी तथा नहि सोढुं प्रबभूव दारुणम्।।

गृहिणीं सचिवं सखीं मिथः प्रियभार्यां परिहाय कामिनीम्।
क्व गतो दयितोऽथ मामितः कृपणां प्रेमधनैकजीवनाम्।।

हृदयं हृदयेन सङ्गतं वचनं प्रीतिसमाश्रयं च तत्।
निखिलं च समस्तमेव मे सुखमेवं ननु धूलिसादभूत्।।

विधुरं किमतः परं भवेद् स्थिरतां स्नेहरसे च मे गते।
अतिनिर्दयमच्छिनद् विधिर्निधिमेकं च निधाय हस्तयोः।।

कथमद्य रथः प्रसर्पतां रहितं सारथिना रणक्षितौ।
मुगलैः सह सङ्गरे भटाः कमवेक्ष्य प्रतियुध्यतां नु ते।।

इत्थं विलप्य करुणं करुणामयी सा
शोकस्य सागरमपारमथापि तीर्णा।
चित्तं दधार धरणीसदृशं स्वकीयं
विघ्नैर्मुहुर्विनिहतं च न यत्तु दीर्णम्।।

रेवातीरे पावने राजमाना रेवातुल्या पूजनीया ह्यहिल्या।
माहिष्मत्यां सा निनाय प्रतिष्ठां माहेश्वरं देवमजस्वरूपम्।।

आघातान् सा नियतिविहितान् शत्रुभिर्वा कृतांस्तान्
सेहे राज्ञी, विधिवदशिषद् राज्यमव्याहताज्ञा।
देशे देशे रुचिरकलया मन्दिराणि प्रतिष्ठां
नीत्वा कीर्तिं सुकृतविहितां प्राप चानन्यनिष्ठाम्।।

–000–

4- दाराशिकोहः

य इस्लामधर्मे सुदृढानुरक्तः
बभौ निश्चयेनाथ वेदान्तभक्तः।
उदारः पवित्रश्च चारित्र्यपूतः
स दाराशिकोहो नमस्यो बुधानाम्।।

अभूद्वा बुधौऽसौ किल स्वप्नदर्शी
नु कश्चिन्महर्षिर्नु वा सार्वभौमः।
सुखी तेन सम्राडभूत् शाहजाहाँ
तथा साऽपि जातास्य माता प्रसन्ना।।

सुतं यत्र सर्वैर्गुणैर्युक्तमाप्तुं
पुरे योऽजमेरेऽथ चिश्तीसमाधौ।
सपर्या धुरीणः समं भार्ययाऽसौ
जहाँगीरसूनुः पिता यस्य तेने।।

'गुले-अव्वलीने गुलिस्ताने शाही'-
त्युपाधिर्जहाँगीरभूपेन दत्तः।
अमुष्मै, धरोद्यानपुष्पं नवीनं –
य इत्येवमर्थं सुरम्यं व्यनक्ति।।

स विश्वासभूमिः पितुः स्नेहपात्रं
सुतो लालितश्चैकमात्रं जनन्याः।
तथा चापि भर्ता प्रियो नादिरायाः
सुतस्यापि चास्थायनं पावनं वा।।

प्रजानां पुनर्विग्रहोऽभून्मनोज्ञो
य एकश्च विश्वासनिष्ठासमुत्थः।
जनानां सदा दुःखवह्नेर्विरामो
स रामो यथेष्टो नृपत्वेन तुल्यः।।

न केनापि यत्स्पृष्टमासीत् कदाचित्
अभूद् वाद्यमेकं नवीनं बुधो यः।
अभूद्गुञ्जनं भारतीझङ्कृतीनां
कलं नादमाद्यं नवीनं पुराणम्।।

स मीरो मियाँ तस्य शिष्यश्च मुल्लाः
स शाहेति नाम्ना किल ज्ञायमानः।
जगन्नाथविप्रश्च लालो विरागी
तथेमे इमं शिक्षयामासुराप्ताः।

दयालुं कृपालुं गुणागारमीशं
नृपं प्राप्य राज्यस्य लक्ष्मीः सनाथा।
भवेदित्थमातर्क्य पित्राऽभिषिक्तः
प्रभुर्यौवराज्ये स दाराशिकोहः।।

हदीसं कुराणं च वेदं पुराणं
स चाधीत्य पाण्डित्यमर्मस्पृशोऽभूत्।
नदीष्णश्च जातोऽथ सूफीमतेऽसौ
धियं निर्विकल्पां दधे सत्यसन्धे।।

निगीर्णं तु सत्यं वितण्डावचोभिः
समाप्तं सुतत्त्वं च जल्पैः कथाभिः।
वृथाजल्पवादैः परास्ता च संवित्
न तादृक्षु बुद्धिं दधौ चैव धीरः।।

जहौ नैव धर्मद्रुहैर्हन्यमानः।
स सत्यानुसन्धानदीक्षाव्रतं स्वम्।
त्रयीसांख्यगीतादिशास्त्रार्थसारं
स्वकीयैः प्रबन्धैः बहुधा बबन्ध।।

दृशा चैकया तत्त्वबोधैकनिष्ठः
स वेदान्त-सूफी-मते पश्यति स्म।
स्वकीयैर्नवीनैः पुराकल्पनिष्ठै-
र्विचारैर्नवीनं युगं निर्मिमित्सुः।।

अकुर्वन् विषाक्तं च कौटिल्ययुक्ताः
सदैवार्जवाढ्यैकबुद्धेः सुबुद्धेः।
द्विजिह्वाः खला यस्य मार्गे समेताः
सदा वक्रयातं भुजङ्गप्रयातम्।।

हतो निर्दयं धर्मनाम्नाऽतिचारेऽ-
वलिप्तेन चोरङ्गजेबेन सौम्यः।
सपुत्रः सदारस्तथान्तं च नीतो
नवीनो युगस्यावतारो वदान्यः।।

विनाशो विचारस्य सङ्कीर्णतानां
युगस्याग्रदूतोऽद्भुतः कोऽपि नेता।
प्रचेतास्तथा तत्त्वचिन्तार्णवानां
परास्तः परन्तु प्रकृष्टोऽपि नीचैः।।

महारम्भयुक्तेऽपि वैफल्यमाप्तेऽ-
ध्वरेऽध्वर्युरासीन्मनीषी शिकोहः।
हते निर्दयं वीरदाराशिकोहे
समाप्तिः समेषामभूदायतीनाम्।।

यथा वर्धतेऽसौ हि धर्मान्धतायाः
विषाक्तः प्ररोहो दुराधर्ष एषः।
य उप्तवान् धर्मवृक्षस्य बीजं
स्मरामस्तथा हन्त दाराशिकोहम्।।

–000–

5- रामचन्द्रो द्विवेदी

प्रेयो मित्रं सहृदयमणिर्बन्धुताभावमूर्ति-
र्यो नः शङ्काकुलितमनसां सान्त्वनायालमासीत्।
यस्य स्मृत्या भवति हृदयं प्लावितं मानसं नो
विस्मर्तव्यः कथमिह बुधो रामचन्द्रो द्विवेदी।।

विद्याऽवाप्ता मदनपुरगते येन विद्यालये या
कष्टेनाप्ता गतिरपि तथा सम्प्रदाये च शास्त्रे।
पश्चात् गत्वा अमलधवले लक्ष्मणाख्ये पुरेऽसौ
शिक्षां लेभे प्रवरगुरुभिर्विश्वविद्यालयस्य।।

शैवे शास्त्रेऽध्ययनविधिना साधिकारं प्रविष्टः
पाण्डेयाख्यः सुविहितमतिः कान्तिचन्द्रो महात्मा।
सुब्रह्मण्यः परिणतमना अय्यरो ब्रह्मवादी
द्वावप्यैतौ परममुदितौ प्राप्य यं योग्यशिष्यम्।।

यस्यैवासीदमलधवला कीर्तितुल्या यथाऽऽर्या
भार्या सौम्या कमलसदृशी नाम सार्थं वहन्ती।
हर्षो हर्षो[1] दयिततनयश्चात्मजा सोदया[2]ऽसौ
तस्याकस्मात् सुखमयमिदं हन्त्तं विश्वं प्रणष्टम्।।

पाषण्डानां निरसनपटुर्मण्डनो मण्डनानां
अस्ते राज्ये[3] कथमपि ययौ नैव सादं महात्मा।

1-3. राज्यवर्धन-हर्षवर्धनौ उदया च तस्य अपत्यानि, राज्यवर्धनोऽस्य ज्येष्ठः पुत्रः, अष्टादशवर्षीयोऽत्य-न्ताकस्मिकदुर्घटनायां दिवङ्गतः।

मानी मानं कथमपि न जहौ नैव विग्नश्च विघ्नै-
रात्मानं यो दयितदयितां चापि धैर्याद् दधार।।

प्रज्ञा मेधा धृतिरथ मतिः सा दृढा च स्मृतिर्वा
शैवे शास्त्रेऽप्रतिहतगतिर्मम्मटस्य प्रकाशे।
सा जिज्ञासा कुतुककलिता नूतने चिन्तने वा
सर्वं यातं गतवति दिवं रामचन्द्रे द्विवेदे।।

–000–

6- मिश्राष्टकम्

अतीतं वर्तमानं च भविष्यच्च यथायथम्।
मिश्रो विलोकयत्येष हस्तामलकवत् सुधीः।।

अनन्तगह्वरे शून्यं निर्वाणं चाखिलं तथा।
पार्श्वे निधाय सानन्दं राधाभावे निमज्जति।।

क्षुभिते मानसेऽस्माकं शङ्कार्णवपरिप्लवैः।
उपनेत्रान्तरस्थेन चक्षुषाऽऽश्वासयन्निव।।

पर्युत्सुकीभवंश्चैव माधुर्यं च विभावयन्।
जीवनस्याखिलं पीत्वा हालाहलं तथाऽमृतम्।।

यत्र व्रजत्यसौ साक्षाद् वृन्दावनं च सव्रजम्।
तत्र याति समं तेन श्रीमद्भागवतं तथा।।

वैदग्धी वैदुषी भक्तिः प्रीतिर्नीतिर्मती रतिः।
हल्लीसकं प्रकुर्वन्त्य एनं चानुव्रजन्ति ताः।।

उच्छ्वसन्ति सहस्राब्दाः शताब्दा भान्ति जीविताः।
दूरादेनं परिक्रामन् कालो याति ससम्भ्रमम्।।

धन्या विंशशताब्दी सा धन्येयं चैकविंशतिः।
विद्यानिवासमिश्रोऽयं यस्यामस्यां स्म जीवति।।

–000–

7- भास्करेऽस्तङ्गते

अस्तं यातो दिवससमये भास्करोऽसावकस्मात्
मध्याह्नेऽयं समजनि कथं वा तमिस्राप्रसारः।
रुद्धा सर्वा यतिलयगतिश्छन्दसां नूतनानां
शब्दानां सा झटिति विहता झङ्कृतिर्निर्झराणाम्।।

गोष्ठी रम्या मधुरमधुरास्ताः कथा मान्मथार्थाः
काव्यालापाः सहृदयजनैः सङ्गमेष्वाप्तवाचा।
कान्तिः सार्था हरितहरिता सापि दूर्वादलानां
सर्वं लुप्तं गतवति दिवं भास्कराचार्यविप्रे।।

को वेदानीं रसमयगिरा प्रेरयेत् काव्यगोष्ठीः
वाचः पुष्पैः सुकविसुमनोमालिकां को निबद्धा?।
श्लोकं कञ्चित् निजविरचितं वाऽथ काव्यं पठन्तु
यात्रास्वित्थं रसमयमहो आग्रहं कश्च कुर्यात्?।।

याते तस्मिन् कविबुधनुते भास्करे भारतीनां
अस्तं यातं सकलकविताराज्यमाहो सुराज्यम्।
वीणां स्वीयां रणनरहितां स्थाप्य वाचां च देवी
हित्वा तूष्णीमभवदहहाऽमुञ्चदस्रं वदान्या।।

--000--

चतुर्थी सरणिः

अन्यापदेशसंसारे

1- कृष्णः सर्पः

न शिवो नाप्यशिवो वा स्थितस्तु शिवाशिवयोरन्तराले।
कृष्णः सर्पः कश्चन निरपेक्षोऽहं जनैस्त्यक्तः।।

विषमं विषं निपीतं न मया सञ्जातोऽहं न नीलकण्ठो वा।
हालाहलं नियत्या निहितं नित्यं च मे हृदये।।

हालाहलमप्येतच्चौषधिरूपेण जायतेऽमृतं तु।
सोऽहं पीडां विषमां मनुजैर्दत्तां विषाय सहे।।

चरणाघातं दर्पादास्कन्दनं सतिरस्कारं वाऽपि।
दत्तं दत्तं दुष्टैर्न सहे चोन्नतफणः सदैव।।

फूत्कारं बहुघोरं भीतिं जनयितुमहं करोमि यदपि।
दंष्टुं परं समीहे निर्हेतुकं न तथा कमपि।।

ग्लानो मलिनो दीनश्चान्तर्विषेण पुनर्दह्यमानः।
धन्यस्तथापि जातः कण्ठे निहितः स्वयं शिवेन।।

-000-

2- मत्स्यान्योक्तयः

रे रे मीन जले निलीन इह यद् वार्तं न वार्ता न वा
जानासि स्वरसात् सरस्यविरतं स्वैरं सरस्यत्वरः।
स्वच्छन्दं विहरन् प्रमोदभरितो नान्यत् तथा भावय-
न्नात्मन्येव रतो विलीन इव वा स्वस्य स्वतो मानसे।।

आसन्नां प्रविचिन्तयात्मविपदं जानीहि वा सङ्कटं
कालश्चैष कथान्तकोऽन्तकसमः प्रत्यागतस्त्वत्कृते।
त्रातुं त्वां न समागमिष्यति जनो नो वा प्रभुर्वेश्वरः
स्वात्मानं स्वयमेव रक्ष च विपद्व्यूहेभ्य आत्मेच्छया।।

जालांस्त्वां विततान् विधाय विविधान् बन्द्धुं च बद्ध्वा कटिं
सन्नद्धाः परितो भ्रमन्ति नितरां क्रूराः सखे धीवराः।
हन्तैष गिलितुं समेति विकटो मत्स्यो महानन्यतः
मीन त्वं किल शैवलस्य निरतो व्यर्थं मुधा भक्षणे।।

यांस्त्वां स्वस्य कुटुम्बिनः कलयसि ज्ञातीन् निजान् बान्धवान्
मत्स्यास्त्वां गिलितुं लुलन्ति सलिले लोला हि तैमिङ्गिलाः।
मा चैनं कलयात्मबन्धुमपि तत् तीरे स्थितं सज्जनं
कण्ठे त्वद्ग्रहणार्थमत्र बडिशं सन्नह्य सोऽयं स्थितः।।

हंसा वा वटका बकाः सुविपुले राशावपां रोचिताः
स्वैरं ते सुभगास्तरन्ति विहगाः सत्पक्षपुष्टाः सुखं।

व्यूहे त्वं च समावृतोऽसि परितः क्षिप्तो महासङ्कटे
दीन त्वं किल पक्षहीन इति तन्मीन क्व वा यास्यसि ?।।

ध्यानस्थः प्रतिभात्यसौ मुनिरिव श्वेताम्बरः संयमी
निःस्पन्दश्चरणेन केवलमयं चैकेन तूष्णीं स्थितः।
शुक्लश्चेतसि कृष्ण एव नितरां प्रत्यङ्मना यो बकः।
त्वां चञ्च्वा विनिगृह्य सोऽथ कवलीकर्तुं च निध्यायति।।

एकः सन् कुरुते मलीमसमयं मीनः सरः केवलं
त्वित्याहुः कतिचिज्जनाश्च यदहो मिथ्यास्ति तत् सर्वथा।
एकाकी स भवेदपि पुनर्मीनस्तथैवाच्छतां
रक्षत्येव सरोवरस्य बहुधा सन्दूषितां मानवैः।।

–000–

3- नारिकेलम्

एकोऽसौ प्रबभूव नैकविटपो यो नारिकेलद्रुमः
काचिच्छ्रेष्ठफलप्रसूतिरनघा देवालयेऽस्यार्पिता।
हस्ताद्धस्तमियं तथैव च गता देवप्रसादायिता
युक्ताऽन्यापि च मङ्गले परिणये सत्कार्यकार्येऽथवा।।

तन्तूनामपरा प्रदीर्घततिभी रज्जूयते गुम्फिता
साऽग्नौ प्रज्ज्वलति प्रदत्तहविषा त्वन्या तथैवेन्धनैः।
देशाद् देशमथापि राशिभिरियं यानैश्च पोतैस्तथा
नीताऽन्या क्व गता क्व लोपमयितेत्येवं न जानीमहे।।

पिष्टाऽन्या किल निर्दयं च कृपणैस्तैलस्य निर्यासने
नीताऽन्धे तमसीव रम्यवनिता धम्मिल्लजालेऽपतत्।
निष्ठ्यूता त्वपरा विलासमदिरानिःश्च्योतनार्थं पुन-
र्भक्ष्यं स्वादु बभूव काऽपि सरसा त्वन्या च लेह्यायिता।।

तृष्णार्तैरपरा पुनश्च नितरां घर्मे च शुष्काधरैः
काचिच्छीतरसप्रपाणकविधौ स्वेदाञ्चितैश्चुम्बिता।
भुक्ता चाथ तिरस्कृताऽपि बहुशः सर्वैस्तथोपेक्षिता
प्रक्षिप्ता पतिता पुनः क्वचिदहो वीथीषु शेतेऽन्यथा।।

-000-

4- स्नुही

न वर्तन्ते वृक्षा वटसरलनिम्बाम्रसदृशाः
प्ररोहोऽश्वत्थानां कुत इह भवेत् सैकतचये।
परं तीक्ष्णो घर्मस्तपति खलु दावाग्निसदृशः
अनन्तोऽकूपारो प्रसरति च शुष्को मरुभुवाम् ।।

महाहाहाकारः प्रसरति भुवौ सैकतचये
निदाघो भूभागं गिलति सुरसाया मुखसमः।
प्रचण्डोऽयं सूर्यो किरति बहुधाऽङ्गारशकलान्
स्नुही चैका सैयं विरचयति युद्धं मरुभुवा।।

–000–

5- उष्ट्रः

वर्णा ते परिवर्तयन्ति सहजं येषां न कापि स्थितिः
आस्तां ते प्रतिसूर्यका बहुविधं ये वणभेदं दधुः।
एकः स्थायिविपाण्डुरद्युतिमये वर्णे स राराज्यते
उष्ट्रो वर्णविपर्ययं न कुरुते धत्ते सदैकां स्थितिम्।।

विस्तीर्णे किल चात्र चित्रफलके विश्वे धराया पुन-
र्वर्णैरत्र विचित्रचित्ररचना नैकैर्विधात्रा कृता।
वर्णः किन्तु स कोमलोऽतिमसृणश्चोष्ट्रस्य यो विग्रहे
स्थायी कम्रविपाण्डुरः पुनरसौ नान्यत्र वा दृश्यते।।

वीरो याति रणाय वक्रिमगतिर्वक्रो रणेऽसौ यथा
उष्ट्रो याति रणे मरुस्थलगते कच्छप्रदेशे तथा।
स्वादुङ्कारमिमे रसांस्तु विविधान् मांसाशिनो भुञ्जते
उष्ट्रः केवलमत्ति कण्टकततिं नो नीलकण्ठः परम्।।

नो शुक्लो न च कृष्ण एव न पुनर्बभ्रुः परं मृत्तिका-
तुल्यो राजति चाकचिक्यरहितश्चोष्ट्रस्य वर्णः परम्।
पानीयं च तथोदरे सुनिभृतं दुःखं स्वचित्ते तथा
उष्ट्रो रक्षति भारतीयजनतातुल्यः सहिष्णुः पशुः।।

हंसस्यापि गजस्य चापि गतयो नीता मुहुस्तुल्यतां
नो केनाप्युपमानतां हि गमिता तूष्ट्रस्य सैषा गतिः।

धर्मस्य त्वरितां गतिं स्थिरततां संस्मारयन्ती पुनः
सर्वेषां गमनं तथा विचलनं न्यक्कृत्य सा शोभते।।

ग्रीष्मे वा शिशिरे तथैव विषमे झञ्झाकुले प्रावृषि
ग्रामे वा नगरे पथि प्रकटितोन्मेषा तथा सङ्कटे।।
सङ्ग्रामेऽप्यथ शर्कराकुलपथे चोच्चावचे घट्टिता
झञ्झावातसमा तथैव विषमा ह्युष्ट्रस्य सैषा गतिः।।

–000–

6- विघ्नेशः

विघ्नेशो विविधैः स्वयं स तु मुहुर्विघ्नैर्भृशं वारितः
मञ्चे सम्प्रति सोऽयमेष कदलीस्तम्भाञ्चिते राजते।
नेतॄंस्तान् कलहप्रसक्तमनसश्चायोजकान् दाम्भिकान्
किं वा पश्यति किं विचिन्तयति वा तूष्णीं गणेशोत्सवे।।

किं वास्य स्मृतिमेति सोऽपि च शिवः कैलाससानौ स्थितः
माता वा जगदम्बिका स्यवपयसा यैनं पुपोषाञ्जसा।
विश्वस्य भ्रमणं क्षणेन कृतवान् बुद्धैर्विधाता तु यः
सोऽयं चात्र विसर्जनाय निगडैर्बद्धः क्वचिन्नीयते।।

-000-

7- वृक्षाः

पादैः स्वैः परिवार्य मृन्मयततिं नीचैर्निखातैर्दृढै-
र्ये रक्षन्ति धरां धराधरसमा वृक्षा धरावल्लभाः।
पातालं च गवेषयन्ति निभृतं मूलैरधोगामिभि-
श्चाकाशं बहुधा स्पृशन्ति सहजं शीर्षैरनन्तैस्तथा।।

शुष्कस्तिष्ठति जीवनस्य चरमे सोऽयं क्षणे पक्षिणे
स्थाणुः किन्तु ददाति सोऽपि शरणं नीडे निजे कोटरे।
कोऽप्यंशोऽस्य भवेन्मदीयनिलये काष्ठस्य वा विष्टरे
देहल्यामथवाऽपि चित्रफलके चासन्दिकायां तथा।।

-000-

पञ्चमी सरणिः

पुनर्यात्रा

1- शब्दाः

शब्दा ये लिखिता मया क्वचिदपि प्रोक्ता क्वचित् कण्ठतः
कण्ठे च स्खलितास्तथा स्मृतिपथं नीताः क्वचिच्चिन्तिताः।
शब्दा व्यक्तिमुपागता न खलु ये चित्ते च ये संस्थिता-
स्तैः शब्दैः परिभाषयामि सततं त्वात्मानमालोकयन्।।

शब्दैरेव विनिर्मितोऽस्मि निखिलः क्रीडामि शब्दैस्तथा
वामं शब्दमयं वपुर्भवति मे चार्थात्मकं दक्षिणम्।
शब्दा मां विनिवारयन्ति कृपणात् पापात् तथा कर्मणः
प्रावृत्यातिदृढं च लौहकवचं निर्मान्ति मां सन्ततम्।।

शब्दे मज्जति वाक्यमेव सहजं वाक्ये तथा पङ्क्तयः
पङ्क्तिर्मन्त्रयतेऽथ साऽपि सुभगा ह्यन्याश्चपङ्क्तीस्तथा।
शब्दे या किल चेतना तरलिता साऽस्मासु वै प्राणिति
शब्दत्वेन चितिर्बभूव सहजं शब्दोऽथवा सा बभौ।।

शब्दायत्तमिदं जगच्च निखिलं शब्दैस्तथा निर्मितं
शब्दास्ते प्रविशन्ति चेतसि तथा निर्मान्ति लोकं परम्।
शब्दास्ते नु पुरातना अपि पुनश्चार्थाश्च ते शाश्वताः
घृष्टाः नः किल पूर्वजैर्व्यवहृताः अद्यापि नव्याः परम्।।

-000-

2- रेवातटे होलिका

द्रोणी कापि तु वर्ततेऽतिमहती विन्ध्यस्य सोपत्यका
यस्यां पूरयतीह काननमिदं वृक्षैः स्वकीयैः करैः।
पुण्यं चित्रविचित्रवर्णविशदं रेवाजलं सर्वतः
नानावर्णविचित्रवारिसुभृता द्रोणी तथा जायते।।

अस्मिन् रक्तपलाशपुष्पनिचया विन्ध्यस्य ते मिश्रिता
आकाशोऽवतरन् स्वयं पुनरहो गाढं जगाहे जले।
मृत्स्ना बभ्रुकपोतपिङ्गलमयैर्वर्णैः सुवर्णैर्युता
श्रीकण्ठस्य च नीलकण्ठसदृशास्ते प्रस्तराश्चूर्णिताः ।।

स्नान्तीनां सहजस्मितैर्धवलिता शुभ्राच्छदन्तद्युतिः
गाढं तानि च कोटिकोटिजनतापापानि पुण्यानि वा।
एषा मञ्जुलवञ्जुकुञ्जहरितच्छाया पुनर्बिम्बिता
वर्णेषु च्छुरितेषु कश्चन पुनर्वर्णोऽत्र सञ्जायते।।

नानावर्णविचित्रितं च विपुलं यन्नर्मदाया जलं
नासौ तत्र विलक्षणो न च पुनर्वर्णस्स रेवागतः।
वर्णाढ्यां सुलिपिं च कामपि पुना रेवा पवित्रां तटे
स्वीयैरूर्मिकरैर्लिखत्यनुपमां ब्राह्मीं तथा नागरीम्।।

नानावर्णविचित्रितं च विपुलं रेवाजलं काङ्क्षति
कृष्णस्तेन समेत्य चात्र तनुतां होलोत्सवं हर्षितः।

शृङ्गोन्मुक्तजलैरियं च निखिला सृष्टिर्भवेत् सम्प्लुता
लीला सा च वसन्तरासकलिता रेवातटे जायताम्।।

आयातोऽस्ति पुनश्च कृष्ण इह स क्रीडाकलाकौतुकात्
रेवाया पुलिने प्रसन्नसलिले होलोत्सवं कारितुम्।
भर्तु यावदसौ जलेऽत्र विमले स्वं शृङ्गकं नामयेत्
तावल्लक्षजनाः जलस्य पटले विस्थापिताः बिम्बिताः।।

लोकानां चलतां तटाद् विचलतामुत्सारितानां हठात्
पीडाया घनमेचकः स मसृणो वर्णो जले मिश्रितः।
वर्णः कोऽपि विषादजोऽत्र निहितो रेवाजले सर्वतः
कृष्णः शृङ्गकमेव सोऽत्र च करे धृत्वाऽवसन्नः स्थितः।।

—000—

3- नर्मदायाः कराः

क्वेमे ऊर्मिमया अतीवमसृणा रेवाकराः कोमलाः
क्वैते वा किल वज्रसारपरुषा वैन्ध्याः पुनः प्रस्तराः।
एते एव कराः परन्तु मसृणा सन्तो निरस्त्रा यथा
तक्षन्त्येषु च नर्मदेश्वरमहो उद्भावयन्तीश्वरम्।।

सावेगा किल कीदृशी प्रमथनी रेवाकराणां गतिः
यत्र भ्राम्यति बम्भ्रमीति चकितो लीनो विलीनः शिवः।
कल्पान्तं भ्रमति स्म जह्नुतनया यन्मूर्ध्नि रुद्धा दृढं
सोऽयं गह्वरसंस्थितोऽत्र सहजं बालैर्बहिः कृष्यते।।

–000–

4- नो तज्जलम्

कामं नारदतुम्बुरुप्रभृतिभिस्तानाः कलं झङ्कृताः
गीतं नन्दनकानने पुनरिदं दिव्याङ्गनानां स्वरैः।
राज्ञी रूपमती विभावयति सा निर्विण्णचित्ता परं
स्वर्गे वस्तु समस्तमस्ति न परं सा विद्यते नर्मदा।।

ध्यानं क्वापि विधाय शान्तमनसा साऽऽकाशगङ्गातटेऽ-
हिल्या कल्पतरोस्तले स्थितवती शान्ता गभीराकृतिः।
दुश्चक्रं किल राजनीतिजटिलं नो बाधतेऽस्याः मनः
राज्ञी होलकरस्य किन्तु निबिडं सा चिन्तया गुम्फिता।।

सम्पाद्या खलु केन चैव विधिना देवाभिषेकक्रिया
पिण्डीं स्वीयकरे शिवस्य शुभदां धृत्वा त्वहिल्या स्थिता।
अस्याः कामयतेऽभिषेकविधये चेतस्तु रेवाजलं
स्वर्गे वस्तु समस्तमस्ति न परं तद् वै जलं निर्मलम्।।

–000–

5- पुनर्जलानि

मध्याह्ने प्रखरे नखम्पचपथे तप्तासु रथ्यास्वहो
आदाय स्वकरे घटान् बत घटाकाशांस्तथाऽऽशाः पुनः।
दूराद् दूरमिमे व्रजन्ति महिला बालास्तथा बालकाः
अन्विष्यन्ति जलं फलं नु परमं सृष्टेर्यथा दुर्लभम्।।

शुष्कं वारि धरागतं गतमिव प्राप्तं यथा स्यादृणं
नैवाप्येत कणं जलस्य तु मरोरस्मिन् महद्विस्तरे।
तृष्णैका तरलायते जलं तु विरलं सञ्जायते प्रत्यहं
नो कूपेषु सरस्सु नापि, सरितास्वाहो जलं विद्यते।।

-000-

6. रैभिलगीतिः

गायति रैभिल एष हि रैभीं गाथां तथा च नाराशंसीम्।
कलमधुरा स्वरलहरी प्रसरति भवति च मनो विकलम्।।
जनता नितरामार्ता चार्यकमेव प्रतीक्षमाणाऽऽस्ते।
नगरे प्रसरति वार्ता नरपतिरहह नृशंसो जातः।।
नैकः कोऽपि शकारो विकटाकाराः शतं शकारास्ते।
उज्जयिनीं स्कन्दन्तः स्वैरं रात्रिन्दिवं चरन्ति।।
धावति वसन्तसेना त्रातुं च विकटविटेभ्य आत्मानम्।
रैभिलगीतिर्गुञ्जति करुणं करुणाकुले हृदये।।

-000-

7-धीवरगानम्

ग्रीष्मोऽयं नितरां विदीर्णवसुधाचित्तो मुहुर्जृम्भते
शुष्का चास्ति गलत्पटीव च नटी चेयं तटी पार्श्वतः।
वर्षा वाऽस्तु शरत् क्वचित् क्वचिदयं भीष्मोऽथ ग्रीष्मोऽथवा
गन्तव्यं पुनरस्ति दूरमभितो वारांनिधौ गर्जति।।

आकाङ्क्षा गमनाय दूरमभितो जागर्ति नित्यं नवा
नौकां सारयितुं च सत्त्वरमितः सा विद्यते योग्यता।
आसक्तिः किल सागरं प्रति पुनश्चित्ते भृशं वर्धते
का शाब्दी घटना विराजति वरे याते तथा धीवरे।।

संसारः सरतीह वस्तु निखिलं यन्नश्वरं विद्यते
आवर्तभ्रमिवत् तरङ्गततिवत् तज्जायते क्षीयते।
सत्यं केवलमस्ति धीवरजनैर्यद् गाह्यते तीर्यते
प्रोद्वेल्लत्पयसां चयेन चलितः सच्चिन्मयः सागरः।।

विस्तारं पुरतः समीक्ष्य नितरामानन्त्यमब्धेस्तथा
भीतं क्वापि तथैव कातरमहो याने मनो जायते।
क्वापि क्वापि तता व्यथा प्रभवति द्वन्द्वाकुलैः संशयैः
पारेऽस्मिन् स्थिरतामवाप्तुमपि सा वाञ्छा भृशं जायते।।

-000-

8- विमानयात्रा

रूपेषु नैकेषु च कामरूपा देशा अनूपैर्बहुधा ततास्ते।
दृष्टा विमानात् बहुधाऽवृतास्ते त्वभ्रैरनभ्रं गगनं स्पृशद्भिः।।
नीलं निचोलं गगनस्य धृत्वा मेघोत्तरीयं परिधाय चांसे।
सहस्रशीर्षा पुरुषः पुराणो वातायनाद् दृश्यत एष यास्यन्।।
काया तदीया प्रविभाति सैषा माया तथाऽऽच्छाद्य विभाति भूयः।
छाया यदीया प्रतिबिम्बिताऽऽस्ते मच्चेतनायां नु समर्चितायाम्।।

–000–

9- शिमला-1

कालः
उच्चावच्चे
पर्वतमार्गे
आरोहति स्खलति
अटति
भीतश्चटति
अथ क्लाम्यति श्राम्यति
स्तब्धस्तिष्ठति
वृक्षच्छायायाम्
उच्चैरुच्छ्वसन्
नीचैर्निःश्वसन्।
महाकालः स्मयते
पश्यति च तम्
उपरिष्टात्।

–000–

10- शिमला - 2

भवनमिदं
सार्धशतं समाभ्यः प्राक् विनिर्मितम्,
अत्र महामहिमानः स्नान्ति स्म
इदं तेषां पायुप्रक्षालनमन्दिरम्,
अस्मिन् कक्षे
पश्यन्ति भवन्तः
इमानि काचगोलकानि छदेर्लम्बमानानि
इमानि बेल्जियमत आनीतानि
इयं विद्युत् प्रणाली
स्काटलेण्डदेशादत्र आनीय योजिता
तदानीं समग्रेऽपि देशे नासीत् कुत्रापि विद्युत्
केवलं प्रकाशमापेदे इदमेव भवनम्।
इत्थं रारटीति पर्यटकनिदेशकः।
श्रान्ताः पान्थाः
श्वसन्ति, पश्यन्ति
अपेक्षन्ते उद्घाटितमेव स्यात्
किञ्चित् रहस्यम्
येन किमपि किमपि भविष्यति
विशाले प्रासादे किमपि न भवति।
पर्यटकाश्चिन्तयन्ति--
यस्मिन् कक्षे
महामहिमानो मूत्रयन्ते स्म
तस्मिन् तेषां तथा कर्तुं किमुचितं स्यात् ....

–000–

11- शिमला - 3

शिमलायामन्तः
विलुप्ता वर्तते कापि शिमला
अमुं पुरः पश्यत देवदारुम्
कदाचिदसौ पुत्रीकृतः स्याद् वृषभध्वजेन,
हेमकुम्भस्तननिर्गतानां स्कन्दस्य मातू
रसानां तदानीमनभिज्ञः स्तब्ध इदानीम्,
कदाचिद् बिभेति
कदा कुठारः पतिष्यति पीठे तस्य....

–000–

12- स्मृतिः

स्मरामि
केवलं नयने स्मरामि
स्मरामि नयनयोरश्रु आसीत्
क्वचित् कदाचित्
अश्रु क्व विगलितमिति न जाने
स्मरामि केवलं नयनम्।

-000-

13- श्मशानम्

प्रज्ज्वलन्ति चिताः

वेल्लन्ति प्रेताः

परित आहिण्डन्ते

गृध्राः

परस्परमभिभवन्तः शृगालाः

उन्मिषन्ति ज्वालाः

उन्मिषन्ति स्मृतयः

घृतम् घृतम् घृतम्

आनय घृतम्

लेपय घृतम्

देहेऽस्मिन्

पुरोहितः कथयति

यजमान!

यावदेव घृतम्

तावती मुक्तिः

आयुर्वै घृतम्, घृतमेवायुः

एतावानस्य महिमा अतो ज्यायांश्च पूरुखः

पुरोहितः पुनरपि पठति

किमवशिष्टम्..

गिलन्ति ज्वालाः

शनैः शनैर्जीवनसर्वस्वम्।

–000–

14- सोऽयमिषोरिव ......

एतदेवासील्लक्ष्यं शतायुषः पुरुषजीवनस्य
अपराह्णे परिश्रान्तस्य
गृहागमनम्,
गेहिन्या परितोषस्निग्धया दृशा
विलोक्य
समर्पितं कषायचायचषकं
करे धृत्वा चायपानम्
तस्मिन् निधानम्
स्मृतीनाम्
विस्मरणं च यत्किमप्यभवत्
इतस्ततस्ततो वानम्
निवारणं च समेषाम्
चिन्तासन्तितितन्तुजालानाम्
अस्यैवाप्तये विहितं सन्धानम्
सूक्ष्मशरीरस्य इषोः
सोऽयमिषोरिव दीर्घदीर्घतरो व्यापारः
भित्वा नानालक्ष्यजातम्
सम्प्राप्तः पुनरयमिषुः
इहैव।।

–000–

15- विभीषणविलापः

किमर्थं दत्तं मह्यम्
अमरत्वमिदम्,
किमर्थं चाहं
परित्यक्तः प्रभो
लङ्कायामस्याम्
अहमिह एकाकी
त्वं च प्रयाणं कृतवान् त्रेतायामेव स्वधाम्नि
अहमिह सीदामि, चेखिद्ये दूये
जीवनायासूये,
इयं स्वर्णमयी लङ्का नैव मे राम रोचते
मन्दोदरी विलोकयति माम्
विषाक्तनयनाभ्याम्
तस्यै असूयन्ते
अन्या राज्ञः,
अन्याभ्यश्च सा विरज्यते।
द्विषन्ति सन्ततयो मदीया
एव
मह्यम्। असह्यम्।
जायते शङ्काकुलम्

जीवनं लङ्कायाम्।
हनूमानपि
न सम्प्रति साहाय्यं विदधाति मनागपि,
सोऽपि किं करोतु।
स स्वयमेवामरतया उद्विग्नः
स च परशुरामश्च परस्परं कलहायेते
हिमालयस्य कस्याञ्चित् कन्दरायाम्।
कालो न याति, यामि अहमेव,

यास्यन्नपि तिष्ठामि
यामि अहम् विशीर्येऽहम्
कीदृशमिदममरत्म्,
यन्मह्यं राम त्वया प्रदत्तम्,
अस्मात्तु शतकृत्वो वरम्
नश्वरत्वम्,
अस्मात्तु सहस्रकृत्वो वरं
सीताया इव चितायां ज्वलनं
भूमौ विवरे वान्तर्धानं तस्याः।

–000–

16- सोपनेत्रा-1

न स्मरामि तद् दिनम्
यदा इदम्प्रथमतया तया
जाते दृष्टिदौर्बल्ये
उपनेत्रं धृतम्।

यदा यदा गृहाद् बहिर्यामि
तदा तदा सोपनेत्रायास्तस्याश्छविः
मम पृष्ठतो लगन्ती आस्ते।

काठिन्येन तयोरीकृतमासीत्
उपनेत्रधारणम्,
उपनेत्रं धत्स्व, धत्स्व उपनेत्रम् – अहं कथयामि स्म;
सा साभियोगमाह -
एतावती रुदितास्मि, एतावती रुदितास्मि त्वत्कारणात्,
यन्नयने निर्बले जाते।

निकटस्थं मां यदा निर्वर्णयति सा
नासिकाया अधः स्रस्ताद् उपनेत्रादुपरि
परिष्ठिते नयने तस्याश्चमत्कुरुतः
चमत्कारः स तस्या नयनयोः
उपनेत्रमतिक्रम्य,
तिष्ठति मां परितः।

चिन्तयामि सा कियती विशिष्यते
मम पितामह्याः, मम दिवङ्गताया मातुः,
अतीतायाः शताब्द्यास्ताभ्यो महिलाभ्यः,
यासां दुर्बलनयनैर्धारयितुं नोपलब्धानि
उपनेत्राणि।

–000–

17-सोपनेत्रा-2

कदाचिदुपनेत्रं विलुप्यते
विलुप्त उपनेत्रे
निर्वाप्यते नयनयोश्चमत्कारः।

कुत्र स्थापयित्वा विस्मृतं मयेति जल्पन्ती
उपनेत्रमन्विष्यति सा
गृहस्य कोणे कोणे।
अनन्ताः सम्भावनाः सन्ति
उपनेत्रं तया क्रीडति -
विशालस्य सदनस्य कस्मिंश्चिल्लघुतमे कोणे
निलीय क्वापि तिष्ठति तत्।
विलुप्तम् उपनेत्रं पश्यति तां विहसन्
सा न पश्यत्युपनेत्रम्

यथा यथा अदर्शनं वर्धते उपनेत्रस्य
सा विषण्णा व्यग्रा भवति,
वर्धते तस्या विषादः।
उपनेत्रं यत्र यत्र भवितुमर्हति,
तत्र तत्र सा
पश्यति मुहुर्मुहुः,

कपाटिकाया अस्या उपरि स्यादिति कृत्वा
तत्र हस्तेन परामृशति,
पानीयवेदिकापार्श्वे,
कुम्भ्या जलनिस्सारणसमये निहितं स्यात्,
वायुचुल्लिकायाः पुरः स्यात्
भोजनपीठके शरावाणां चषकानां मध्ये स्यात्,
आलुकानि निस्सारयन्त्याः कण्डोले निपतितं स्यात्,
पूर्वं यत्र तत्र विस्मृत्य उज्झितं,
तत्र तत्र सा पश्यति,
नयने उपनेत्रं न पश्यतः
कदाचित् करौ उपनेत्रमनुभवेताम् -
इति धियेव यत्र वा तत्र वा,
सा आम्रेडयति करम्।
अत्रापि नास्ति, तत्रापि नास्तीति बुद्बुदाक्षरैर्वदन्ती
सा निखिले गृहे भ्रमति।
अतितरां क्षीणैव वर्तते सम्भावना
यत् पुस्तकानां पञ्जिकानां वा मध्ये
अध्ययनपीठके तत् स्यात्,
तथापि तत्र त्ववश्यमवलोकनीयमेव।
भोजनं कृत्वा दरनिमीलितनयना सा शेते स्म,
अनन्तरं नयनक्षालनाय प्रक्षालनद्रोणीं गता,
तत्र न दृश्यते।
तथापि सा तत्राप्यवलोकयति,
सहसा दृष्टिपथमुपैति

मध्याह्ने वस्त्रक्षालनयन्त्रस्य उपरि न्यस्तं
तस्या नयनाभ्यां वियुक्तं अन्धतां गतम्,
सीददिव उपेक्षितम्
उपनेत्रम्,
हन्त, लब्धं नेत्रनिर्वाणम्।

–000–

18- गुरुवायूरमन्दिरे येशुदासः

गुरुवायूरमन्दिरे
येशुदासो भक्तिगानं गातुमारभत
समुत्थिताः स्वराश्च तस्य
जुगुञ्जुः समस्ते प्राङ्गणे
गर्भगृहे संस्थितः
भगवान् श्रीकृष्णः
मुरलीमन्विष्यति स्म
कुत्रास्ते मुरली मदीया
यदि हस्ते अभविष्यत्
तर्हि
गीतेरस्याः सङ्गतौ मुरलीं वादयम्,
मुरली कुत्रापि नासीत्
तथापि कुतः श्रूयते मधुरो मुरलीरवः
मुरली येशुदासस्य कण्ठे विश्रान्ता आसीत्।

–000–

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

विद्यया विन्दतेऽमृतम्